॥ श्रीः ॥

हरिदास-संस्कृत-ग्रन्थमाला

१५७

व्याकरणाचार्यपरीक्षोपयुक्तं

# प्रबन्धामृतम्

S
891.202 4
T 326 P

...ोरीज आफिस, वाराणसी-१

॥ श्रीः ॥

हरिदास संस्कृत ग्रन्थमाला
१५७

व्याकरणाचार्यपरीक्षोपयुक्तं

# प्रबन्धामृतम्

रचयिता-

विद्यावाचस्पतिः श्रीरमाकान्तठक्कुरः

चौखम्बा संस्कृत सीरीज आफिस, वाराणसी-१

प्रकाशक : चौखम्बा संस्कृत सीरीज आफिस, वाराणसी
मुद्रक : विद्याविलास प्रेस, वाराणसी
संस्करण : द्वितीय, वि० सं० २०२०
मूल्य : १-५०

INDIAN INSTITUTE OF ADVANCED STUDY
Acc. No. 6524
Date 16/1/65
SIMLA

S
891.2024
T326 P

© The Chowkhamba Sanskrit Series Office,
P. O. Box 8, Varanasi.
1964

Phone : 3145

Library IIAS, Shimla
S 891.202 4 T 326 P
00006524

THE
HARIDAS SANSKRIT GRANTHAMALA
157

# PRABANDHĀMṚTAM

( A Selection of Compositions for the use of the students of the Vyākarṇachārya Examination.)

BY

S'RĪ RAMĀKĀNTA THAKKUR

THE
CHOWKHAMBA SANSKRIT SERIES OFFICE
VARANASI-1

# भूमिका

विदितमस्तु प्रेत्तावत्सु विद्यार्थिसमाजेषु च यद्विहारसंस्कृताचार्यपरीत्तासु पञ्चाशदङ्कवलितः प्रबन्धः स्वस्वग्रन्थे विहारसंस्कृतसमित्या नियमितः। स च यद्यपि सुलभोऽपि परन्त्वल्पेन कालेन नातिदीर्घं तं विरचय्योत्तरितुं न प्रभवन्ति नितरां सुकोमलधियश्छात्रा इति।

अतो व्याकरणाचार्यपरीत्तां दित्सवो मदन्तेवासिनो गुरुकुलवासोचितैर्गुरुशुश्रूषादिधर्म्मैरत्यन्तं मां समतूतुषन् सप्रश्रयमब्रुवँश्च यत्तां रीतिमस्मभ्यं समुपदिशन्तु, यया रीत्या स्वल्पया वेलया तादृशं प्रबन्धं निर्मातुं परं शक्नुमो येन पूर्णाङ्कं लप्स्यामहे वयमिति।

तत्प्रार्थनावशंवदेन मयाऽतिसंत्तिप्तं प्रबन्धामृतं व्यरचि आशास्यते च पदवाक्यसुसाधुत्वविदां कोविदानामिदमसन्तोषजनकमपि परीत्तोत्तीर्णताप्रवृत्तिचटुलचेतसां कुशाग्रबुद्धीनामपिच्छात्राणां सन्तोषकरं स्यादिति।

लोहना |
वि० सं० १९९९ |

**रमाकान्तस्य**

# समालोचना

मैथिल-श्रोत्रियवंशोद्भवेन व्याकरणतीर्थेन विद्यावाचस्पतिना पण्डितप्रवरेण समुत्तारिताचार्य्यपरीक्षानेकच्छात्त्रेण सुप्रसिद्धेन श्रीरमाकान्तठक्कुरशर्म्मणा विरचितमिदं 'प्रबन्धामृत'-मद्यत्वेतनानां परीक्षां दित्सूनामाश्रयमुपलिप्सूनां व्युत्पित्सूनामवश्यमेवोपकरिष्यत्यन्तेवासिनां वैयाकरणानाम् ।

इदमीयोऽतिमहानेष सङ्कलनपरिश्रमः परीक्षां प्रविविक्षुभ्यः प्रबन्धभिक्षुभ्यश्छात्त्रेभ्यः परीक्षामहोदधेस्त्राणाय पोत इव हितो भविष्यति ।

सुचारुसन्निवेशिता ग्रन्थस्था विषया आलोचक-लोचनाभ्यां कियद्रोचन्त इत्यादानसंवेद्यमेवेति कृतं प्रशस्तप्रशंसाबाहुल्येन ।

**श्रीत्रिलोकनाथमिश्रः**

# प्रबन्धानुक्रमणिका


| | | |
|---|---|---|
| व्याकरणाध्ययनस्य प्रयोजनम्<br>शब्दानुशासनस्य प्रयोजनम्<br>व्याकरणाध्ययनस्योपयोगिता | ... | १ |
| व्याकरणपदार्थः | ... | ४ |
| सूत्राक्षराणां पारायणे पुण्यजनकता | ... ... | ६ |
| शब्दा नित्याः | ... ... | ७ |
| स्फोटः | ... ... | ९ |
| शक्तिः | ... ... | १३ |
| समासशक्तिः | ... ... | १७ |
| लकाराणां कृतौ शक्तिः कर्त्तरि वा | ... ... | २० |
| धात्वर्थः | ... ... | २६ |
| व्यापारमुख्यविशेष्यकः शाब्दबोधः | ... ... | २९ |
| निपाता द्योतका वाचका वा | ... ... | ३२ |
| तिङर्थः | ... ... | ३४ |

॥ श्रीः ॥

# प्रबन्धामृतम्

गिरीशकन्यां परमेशसत्कृतां प्रणम्य देवीं परमार्थसिद्धये ।
लघुं प्रबन्धामृतसंज्ञकं मृदुं तनोमि भूत्यै प्रियतावशंवदः ॥ १ ॥

प्रणम्य वाङ्मयीं देवीं प्रबन्धामृतमुत्तमम् ।
करोमिच्छात्रसन्तुष्ट्यै रमाकान्तः सुधीरहम् ॥ २ ॥
मदीयश्रममाचार्यपरीक्षादित्सवो ध्रुवम् ।
परामृशन्त्वदोषज्ञाः शब्दशास्त्रनये स्थिताः ॥ ३ ॥

## (१) अथ व्याकरणाध्ययनस्य प्रयोजनम् ।

## शब्दानुशासनस्य प्रयोजनम् ।

## व्याकरणाध्ययनस्योपयोगिता ।

धर्मार्थकाममोक्षाख्यपुरुषार्थचतुष्टयफलप्रधाने कर्मनिबन्धने विचित्रेऽस्मिन् जगतीतले तेषामवाप्तये द्विजातिभिः साङ्गवेदाध्ययनमवश्यं विधेयं, ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति श्रुतेर्वक्ष्यमाणहेतोश्चेति नाविदितं विचक्षणानाम् । वेदाङ्गानि–शिक्षा, व्याकरणम्, छन्दः, ज्योतिषम्, निरुक्तम्, कल्पश्चेति । तथाह्यभियुक्तोक्तिः—

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।
तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥ इति ॥

शरीरावयवेषु प्रधानाङ्गं मुखमिवोक्तेष्वङ्गेषु व्याकरणं प्रधानं व्याकरणस्य च शब्दानुशासनमन्वर्थं नाम, अनुशिष्यन्तेऽसाधुशब्देभ्यो विविच्य ज्ञाप्यन्ते साधुशब्दा अनेनेति करणल्युडन्ततया शास्त्रपदेन सामानाधिकरण्याच्छब्दानुशासनं नाम शास्त्रं, तच्च व्याकरणमेवातः शब्दानुशासनं व्याकरणाध्ययनस्य साक्षात्प्रयोजनमाह भगवान् पतञ्जलिः ।

अथ सन्ध्योपासनादिवद्व्याकरणाध्ययनं नित्यं कर्माऽथ काम्यमिति जिज्ञासायामाह—'कानि पुनः शब्दानुशासनस्य प्रयोजनानि'! रक्षोहागमलघ्वसन्देहाः प्रयोजनमिति। अस्य व्याकरणस्य को विषयः, किं प्रयोजनम्, कश्चाधिकारी, कः सम्बन्ध इति चेदत्रोच्यते—लौकिका वैदिकाश्च शब्दा विषयः, तज्ज्ञानं प्रयोजनम्, तज्जिज्ञासुरधीतकाव्यकोपादिरधिकारी, प्रतिपाद्यप्रतिपादकभावः सम्बन्धः। तत्र तच्च प्रयोजनमष्टादशविधं तथाहि—वेदरक्षा, ऊहः, आगमः, लाघवम्, असन्देहः, अम्लेच्छतासम्पत्तिः, स्वरवर्णदोषराहित्यम्, सार्थकवेदज्ञानम्, साधुशब्दापशब्दयोर्धर्माधर्मबोधः, प्रत्यभिवादे नाम्नि प्लुतिज्ञानम्, विध्यादिवाक्यघटकविभक्तिपदार्थादिज्ञानम्, पदाक्षरादिविभागज्ञानम्, चतुर्विधपदजातकालव्यङ्ग्यव्यञ्जकविभक्तिस्थानभेदज्ञानम् (यद्वा सकलपदजातज्ञानम्) वाग्विस्तारसम्पत्तिः, असाधुशब्देभ्यो विविच्य सुशब्दज्ञानम्, अपशब्दप्रयोगजन्यप्रत्यवायपरिहारकप्रायश्चित्ताभावः, नामकरणेषु विहितनामस्वरूपज्ञानम्, सर्वविभक्त्यन्तानां सम्यगुच्चारणम्। तदाह भाष्यकृत्—रक्षार्थं वेदानामध्येयं व्याकरणं, लोपागमवर्णविकारज्ञो हि सम्यग् वेदान् परिपालयिष्यतीति।

अयम्भावः—लोके लोपाद्यदृष्टं वेदे दृष्ट्वाऽवैयाकरणो भ्राम्येद्वैयाकरणस्तु न भ्रमति वेदार्थञ्चाध्यवस्यति। ऊहः खल्वपि प्रयोजनम्। न सर्वैर्लिङ्गैर्न च सर्वाभिर्विभक्तिभिर्वेदे मन्त्रा निगदितास्ते चाऽवश्यं यज्ञगतेन पुरुषेण यथायथं विपरिणमयितव्याः, यथाऽऽग्नेययागेऽग्नेर्मन्त्रोऽस्ति—'अग्नये त्वा जुष्टं निर्वपामी'ति तत्र सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकाम इति विधेः सूर्य्योद्देश्यताकत्वविवक्षायां सौर्य्ये चरौ मन्त्र ऊह्यते 'सूर्याय त्वा जुष्टं निर्वपामी'ति तान्नाऽवैयाकरणः शक्नोति यथायथं विपरिणमयितुम्। आगमोऽपि प्रयोजनम्। अत्रागमः प्रवर्त्तको नित्यकर्मतां व्याकरणाध्ययनस्य दर्शयति—ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति, प्रधानञ्च षडङ्गेषु व्याकरणं प्रधाने च कृतो यत्नः फलवान् भवतीति ब्राह्मणस्याध्यापनं धर्मस्तच्चाध्यापनं वैदुष्यायत्तं तच्च शब्दार्थादिषु साध्वसाधुत्वप्रतियोगिकभेदज्ञानाधीनं, तच्च शब्दादीनां प्रतिपदपाठादिना दुश्शकं शब्दादीनामानन्त्यात्तस्मादुत्सर्गापवादाद्यनुगमकलक्षणेन साध्व-

मतो लघ्वर्थं लाघवेन शब्दज्ञानमध्यस्य प्रयोजनम् । अयम्भावः ब्राह्मणेनावश्यं शब्दा ज्ञेया न चान्तरेण व्याकरणं लघुनोपायेन शब्दाः शक्या विज्ञातुमिति । असन्देहश्च प्रयोजनं व्याकरणाध्ययनस्य । तथा हि याज्ञिकाः पठन्ति—'स्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेते'ति, तस्यां सन्देहः स्थूला चासौ पृषती च स्थूलपृषती, स्थूलानि वा पृषन्ति यस्याः सेयं स्थूलपृषतीति । तां नाऽवैयाकरणः स्वरतोऽध्यवस्यति, पूर्वपदप्रकृतिस्वराद् बहुव्रीह्यर्थावसायः । समासान्तोदात्तस्वरात्तत्पुरुषार्थावसाय इतीति भावः । ते सुरा हेलयो हेलय इति कुर्वन्तः पराबभूवुस्तस्माद् ब्राह्मणेन न म्लेच्छितवै नापभाषितवै म्लेच्छोहवा एष यदपशब्दः, म्लेच्छा मा भूमेत्यध्येयं व्याकरणमित्थं स्वरवर्णदोषराहित्यादीनां व्याख्यानं महाभाष्ये तत्रभवद्भिर्भाष्यकारैः पतञ्जलिमहर्षिभिर्विस्तरेण प्रपञ्चितं तच्च विस्तरभिया यथायथं नात्र प्रतिपादयितुं शक्यतेऽतोऽवश्यमध्येयं व्याकरणम् । श्रीमद्विद्वद्वरवरेण्यः श्रीभास्कराचार्योऽपि स्वग्रन्थे तथा न्यगदत्—

यो वेद वेदवदनं सदनं हि सम्यक् , ब्राह्म्याः स वेदमपि वेद किमन्यशास्त्रम् ।
यस्मादतः प्रथममेतदधीत्य धीमान् , शास्त्रान्तरेषु भवति श्रवणेऽधिकारी ॥ इति ।

किं बहुना व्याकरणज्ञानं विना वेदार्थानवगमाद् वेदबोधितेष्टसाधनताकं कर्म कुर्वन्नपि तत्फलं नाश्नुते द्विजस्तथाहि पौराणिकानां सरणिः—

योऽधीत्य विधिवद्विप्रो वेदार्थं न विचारयेत् ।
स च लोके शूद्रसमः पात्रतां न प्रपद्यते ॥
वेदस्याध्ययनं सर्वं धर्मशास्त्रस्य चापि यत् ।
अजानतोऽर्थं तत्सर्वं तुषाणां कण्डनं यथा ॥
पाठमात्ररतान्नित्यं द्विजातींश्चार्थवर्जितान् ।
पशूनिव च तान् प्राज्ञो वाङ्मात्रेणापि नार्चयेत् ॥ इति ।

व्यासोप्याह—

वेदार्थज्ञो जपं जप्त्वा तथैवाध्ययनं द्विजः ।
कुर्वन् स्वर्गमवाप्नोति नरकं तु विपर्यये ॥ इति ।

तच्च व्याकरणम्—

ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम्।
सारस्वतं चापिशलं शाकलं पाणिनीयकम्॥

इति नवविधं, तेषु—

पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम्।
सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन॥ इति।

पौराणिकसंवादात् पाणिनीयतीव्रतरतपस्सन्तोषितमहेश्वरवरसमवाप्तप्रसादत्वाच्च पाणिनीयव्याकरणस्यातिसारवत्तरत्वं स्वीकृतं सर्वैरित्यन्यदेतत्।

व्याकरणं नाम—अर्थविशेषमाश्रित्य स्वरप्रकृतिप्रत्ययादिविशेषादीन् विदधत् पदखण्डादिविशेषज्ञापकः विशेषेणासमन्ताद्वैदिकाँल्लौकिकाँश्च शब्दान्करोति तथाभूतः पाणिन्यादिमहर्षिप्रणीतो ग्रन्थराशिस्तच्च यद्यप्युक्तरीत्या नवविधं, तथापि सर्वलौकिकालौकिकशब्दव्युत्पादकस्य पाणिनीयव्याकरणस्यैव वेदाङ्गत्वाभ्युपगमो युक्तः स्यात्। व्याकरणान्तरे तु—समेषां लौकिकालौकिकशब्दानां न व्युत्पादनम्। अत एवच्छान्दोग्येऽपि व्याकरणम् (चतुर्दशसूत्ररूपम्) उपक्रम्य वेदानां वेद इत्युक्तम्। अत एवास्य ज्ञाने सर्ववेदपारायणजं पुण्यमित्युक्तम्। किञ्च—

कृते तु मानवा धर्मास्त्रेतायां गौतमाः स्मृताः।
द्वापरे शङ्खलिखिताः कलौ पाराशराः स्मृताः॥

इति वचनेनाचारव्यवस्थावच्छब्दसाधुत्वासाधुत्वव्यवस्थाया अपि पाणिनिकृताया एवाभ्युपेयत्वं वरीवर्त्तीति व्याकरणाध्ययनस्य सङ्क्षेपेण प्रयोजनं मन्वते विज्ञा इत्यवधेयम्।

## (२) अथ व्याकरणपदार्थः।

"एकः शब्दः सम्यग् ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके च कामधुग् भवती"त्यभियुक्तोक्त्या साधुशब्दज्ञाने धर्म इति सकललोकतन्त्रप्रसिद्ध्या च कामं कामाभिलाषिणो जनाः क्षणभङ्गुरायामिहावनौ साधुशब्दान् प्रयोक्तुमीहन्ते यतन्ते च। न हि व्याकरणज्ञानं विना साधुशब्दान् व्यवहर्त्तुं शक्नुवन्तीति निश्चप्रचमतो व्याकरणमित्यस्य कः

पदार्थ इति जिज्ञासा समुदेति । अत आह भगवान् पतञ्जलिः—'व्याकरणमित्यस्य कः पदार्थ' इति । सूत्रमिति चेन्न, द्वाभ्यामपि शब्दाभ्यामष्टाध्याय्याः प्रतिपादनाद् व्यतिरेकाभावेन व्याकरणस्य सूत्रमिति पष्ठ्यर्थस्यानुपपत्तेः । किन्तर्हि, तदन्यत्सूत्राद् व्याकरणं यस्यादः सूत्रं स्यात् ।

ननु सामान्यविशेषशब्दतया तु द्वयोः सहप्रयोगो न विरुद्ध्येत यदा त्वष्टाध्याय्येकदेशः सूत्रशब्देनोच्येत तदा पष्ठ्यर्थोऽप्युपपद्येत इति चेच्छब्दाप्रतिपत्तिः, व्याकरणाच्छब्दान् प्रतिपद्यामहे इति । न हि सूत्रत एव शब्दान् प्रतिपद्यन्ते, किं तर्हि व्याख्यानतश्च । न हि व्याख्यानरहितसूत्रमात्रश्रवणाच्छब्दाः प्रतीयन्ते । ननु च 'तदेव सूत्रं विगृहीतं व्याख्यानं भवति, नहि केवलानि चर्चापदानि व्याख्यानं वृद्धिः, आत् , ऐजिति ।' किं तर्हि—उदाहरणं प्रत्युदाहरणं वाक्याध्याहार इत्येतत् समुदितं व्याख्यानं भवति, एतत्समुदायादेवार्थावसायात् । अथ शब्द इति चेन्न, शब्दे व्याकरणपदार्थे व्याक्रियन्ते शब्दा अनेनेति व्याकरणमित्यत्र ल्युडर्थस्यानुपपत्तेः । तथा ह्युक्तं भाष्यकृता—'नहि शब्देन किञ्चिद् व्याक्रियते, केन तर्हि सूत्रेणेति । शब्दो हि व्याक्रियमाणत्वात्कर्म न तु करणमेवञ्च करणे ल्युटो विधानात्प्रयोगस्यैव विलयापत्तिः स्यात् । व्याकरणे भवो वैयाकरण इत्यत्र सूत्रे भवयोगस्य सम्भवेपि शब्दे तद्योगाभावेन भवे तद्धितानुपपत्तेः । पाणिन्यादिकर्त्तृकशब्दानुक्त्या पाणिनिना प्रोक्तं पाणिनीयम् , आपिशलं, काशकृत्स्नमित्यादौ प्राक्तादितद्धितानुपपत्तेश्च । अस्तु तर्हि लक्ष्यञ्च लक्षणञ्चैतत् समुदितं व्याकरणं, शब्दो हि लक्ष्यः सूत्रं लक्षणम् । न चैवं समुदाये व्याकरणशब्दः प्रवृत्तोऽवयवे नोपपद्यते सूत्राणि चाप्यधीयान इष्यते वैयाकरण इतीष्टं न सिद्ध्येदिति वाच्यं, समुदायेषु प्रवृत्तानां शब्दानां पञ्चाल-तैल-घृत-शुक्ल-नील-कृष्णादीनामवयवेष्वपि पूर्वे पञ्चाला उत्तरे पञ्चालास्तैलं भुक्तं घृतं भुक्तं शुक्लो नील इत्यादि रूपेणाजस्रं प्रवृत्तेर्दर्शनात् ।

अथवा यथा 'राहोः शिर' इत्येकस्मिन्नपि वस्तुनि शब्दार्थभेदाद्भेदव्यवहारः । अनेकावस्थायुक्तशिरो हि राहुशब्दार्थः । यत्किञ्चिदेकावस्थायुक्तं तच्छिरःशब्दार्थः । एवं व्याकरणस्य सूत्रमित्यत्रापि व्यपदेशिवद्भावेन षष्ठ्यर्थस्योपपत्त्या सूत्रमस्तु व्याकरणपदार्थः । अत्र हि व्याकरण-

शब्देन शास्त्रस्य व्याकृतिक्रियायां करणरूपत्वमुच्यते सूत्रशब्देन तु समुदायरूपतेति भेदव्यवहार उपपद्यते । शब्दाप्रतिपत्तिरित्यपि न, अविजानत एतदेवं भवति सूत्रत एव शब्दान्प्रतिपद्यन्तेऽतश्च हेतोः सूत्रत एव, यो ह्युत्सूत्रं कथयेन्नैतद् गृह्येतेति विभावनीयमलमति विस्तरेण ।

## ( ३ ) अथ सूत्राक्षराणां पारायणे पुण्यजनकता ।

इह हि परब्रह्मणः प्रपञ्चभूते संसारे 'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्चे'ति श्रुतेर्जागरूकतया षडङ्गो वेदोऽध्येतव्यो ज्ञेयश्च ब्राह्मणेनेति राद्धान्तो नयः । षडङ्गेषु प्रधानं व्याकरणन्तच्च पाणिनीयमेव 'अइउण्' इत्यादि महेश्वरोपदिष्टचतुर्दशसूत्रमूलकत्वादस्यैव वेदाङ्गत्वात् । चतुर्दशसूत्ररूपवर्णसमाम्नायमुपक्रम्य वेदानां वेद इत्युक्तत्वाच्च । अत एवास्य पारायणे नित्यं पुण्यजनकत्वम् ।

न च 'ञमङणनम्' इत्यादौ मकारप्रत्याख्यानपरं भाष्यं विरुद्ध्येत पाणिनीयसूत्रभेदे पारायणादौ पुण्यजनकत्वहानेरिति वाच्यं ? किमदृष्टार्थमेव तदुच्चारणमुत दृष्टार्थमपीत्येवं विचारपरत्वात् । तदुक्तमिको यणचीति सूत्रे समर्थ्ययोगान्नहि किञ्चिदत्र पश्यामि, शास्त्रे यदनर्थकं स्यादिति । किञ्चिद् दृष्टादृष्टार्थवत् किञ्चिच्छुद्धादृष्टार्थवत् सर्वथाऽनर्थकं न किञ्चिदिति तदर्थः । अत एवाह भगवान् भाष्यकृत्—प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म, तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुं किं पुनरियता सूत्रेणेति । अत एव सोऽयमक्षरसमाम्नायः पुष्पितः फलितश्चन्द्रतारकवत् प्रतिमण्डितो ब्रह्मराशिरिति भाष्यमुपादायोक्तं भर्तृहरिणा—यथैवेदमव्युच्छिन्नं चन्द्रतारकादि एवमक्षरसमाम्नायस्य न कश्चिदाधुनिकः कर्त्तास्तीति । अत एवैकः शब्दः सम्यग् ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके च कामधुग् भवतीति श्रुतिः । तदाह हरिः—

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्त्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥ इति ।

किञ्च पुण्यजनकतावच्छेदकत्वं साधुत्वं तच्च व्याकरणान्वाख्येयत्वमेवातः सूत्रपारायणे पुण्यजनकता, इत्थं सूत्राक्षराणां पारायणे पुण्यजन-

कत्वं समायाति । किञ्चेदमक्षरं छन्दोवर्णशः समनुक्रान्तं ब्रह्मा बृहस्पतये प्रोवाच । बृहस्पतिरिन्द्राय । इन्द्रो भरद्वाजाय । भरद्वाज ऋषिभ्यः । ऋषयो ब्राह्मणेभ्यस्तं खल्विममक्षरसमाम्नायमित्याचक्षते । न भुक्त्वा न नक्तं प्रब्रूयाद् ब्रह्मराशिरिति । इति ऋक्तन्त्रव्याकरणोक्तरीत्याऽक्षररूपस्यास्य चतुर्दशसूत्रकदम्बस्याम्नायत्वम् । आम्नायो वेदापरपर्यायः । अत एवास्य ज्ञाने सर्ववेदपारायणजं पुण्यमित्युक्तम् । एतद्व्याकरणमूलभूतानि चतुर्दशसूत्राणि भगवता परमकारुणिकेन महेश्वरेण पाणिनये उपदिष्टानि । अतः सूत्राक्षराणां पारायणे पुण्यजनकता सकललोकतन्त्रसिद्धेत्यवेहि ।

## ( ४ ) अथ शब्दा नित्याः ।

इह संसारे निश्चप्रचमिदं शुद्धशेमुषीजुषां विविधवाग्गागरञ्जितचेतसां विख्यातवैदुष्यप्रवराणां विदुषां तदनुचराणां च मादृशानां यच्छब्दा एव सकलशास्त्रविचारप्रबन्धे हेतुः, किं बहुना सर्वं हि वक्तव्यं श्रोतव्यं च शब्दाधीनमेव, धर्मागमोपि शब्दायत्त एव, किमतिजल्पितेन लौकिको वा पारमार्थिको वा कोपि व्यवहारः शब्दमन्तरा न निर्वहति तथाह्यभियुक्तोक्तिः—

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥ इति ।

अतोऽधिशास्त्रं शब्दानां नित्यत्वाऽनित्यत्वयोर्बहूनि मतानि सन्ति । तयोः शब्दप्रमाणकालक्षणैकचक्षुष्का वैयाकरणाः शब्दानां नित्यत्वं मन्वते, नैयायिकाश्चाऽनित्यत्वं परन्तु तत्र वयं शाब्दिकानां नयं साधु मन्महे । शब्दानां नित्यत्वानित्यत्वयोर्विप्रतिपत्तौ मीमांसका ध्वनिव्यङ्ग्यं वर्णात्मकं शब्दमाहुस्तेषां नये पदवाक्ये च वर्णसन्दोहरूपे एव भवतः । शाब्दिकास्तत्र मते एकं पटपदमित्याद्यनुपपत्तिं प्रदर्श्य वर्णव्यतिरिक्तं पदस्फोटमिच्छन्ति । अपरे वैयाकरणाः पदे वर्णानामिव वाक्ये पदानां कल्पितत्वात्तेषामर्थवत्त्वमपि काल्पनिकमेवेति वाक्यस्यैव स्फोटत्वाद्वाक्यस्फोटं सङ्गिरन्ते । तत्र प्रतिवाक्यं सङ्केतग्रहासम्भवाद्वाक्यान्वाख्यानस्य लघूपायेनाशक्यत्वाच्च कल्पनया पदानि प्रविभज्य पदे प्रकृतिप्रत्ययविभागांश्च

प्रविभज्य कल्पिताभ्यामन्वयव्यतिरेकाभ्यां तत्तदर्थविभागं शास्त्रमात्रविषयं परिकल्पयन्ति स्म भाष्यतत्त्वविदः । अत एव पदसमूहो वाक्यमर्थसमाप्तौ समर्थमिति न्यायभाष्योक्तिः सङ्गच्छते । वैशेषिकास्तदनुयायिनश्च ध्वनिरेव शब्दस्स चानित्यस्तद्व्यतिरेकेणान्यस्यानुपलम्भादेवञ्च कण्ठादिवच्छास्त्रमपि तस्य कारणमित्याचक्षतेऽन्यथा व्याकरणशास्त्रं निरर्थकं स्याल्लोकत एव समेषां शब्दानां तदर्थानाञ्चोपपत्तेरिति मूर्धाभिषिक्तं हेतुं वदन्ति, तन्न सहन्ते शब्दविदस्तथाहि–'अन्यथाऽनित्येषु वस्तुषु लोकव्यवहारोऽन्यथा नित्येषु । शाब्दश्च व्यवहारोऽनादिवृद्धपरम्पराव्युत्पत्तिपूर्वक इति शब्दानां नित्यत्वमायाति । घटादयश्चार्थक्रियार्थिभिरन्यत आनीयन्ते उत्पादविनाशयुक्ताश्चोपलभ्यन्ते नैवं शब्दा अतो न लोकतः सिद्धिः । किञ्च तन्नये शब्दानामनित्यत्वेनान्तःपातितया वर्णानामप्यनित्यत्वं फलति' । शब्दैर्वर्णानां ग्रहणमिष्टं चेत्सुतराम् । एवञ्च तन्मते वर्णा अर्थवन्त इति चेत्पदे वाक्ये च द्वितीयादिवर्णोच्चारणवैयर्थ्यापत्तिः । वर्णसमूहः पदसमूहो वाऽर्थवानिति चेद्वर्णानामुच्चरितप्रध्वंसित्वेन यौगपद्यासम्भवाद्बोधानुपपत्तिश्च । उत्पत्तेरभिव्यक्तेर्वा क्षणस्थायित्वात्क्षणात्मककालस्य प्रत्यक्षायोग्यत्वेन तादृशकालावच्छिन्नवर्णस्याप्यप्रत्यक्षत्वात् । उच्चारणाधिकरणकालोत्तरकालवृत्तिध्वंसप्रतियोगित्वं ह्युच्चरितप्रध्वंसित्वम् । इको यणचीत्यादौ तस्मिन्निति परिभाषोपस्कृतवाक्यार्थेऽजव्यवहितपूर्वत्वविशिष्टस्येको यणित्यादिरूपेऽर्थेऽयं पूर्वोऽय पर इति नष्टस्य वर्णस्य प्रत्यक्षविषयेदंशब्देन पौर्वापर्यव्यवहारस्य कस्मिंश्चिदपि लक्ष्येऽयोगेन तत्तच्छास्त्रवैयर्थ्यापत्तिश्च दुर्वारा । सदसतोरव्यवहितोत्तरत्वसम्बन्धस्य खपुष्पवद्लीकत्वाच्च । किञ्च तदनित्यत्वे 'एक इन्द्रशब्दः क्रतुशते प्रादुर्भूतो युगपत् सर्वयागेष्वङ्गं भवति' इति भाष्यविरोधापत्तिः । उत्पत्तिविनाशशालिवर्णसंघातरूपपदस्य मनुष्यादिवद्भेदेनैकेति विशेषणानुपयोगात् । किञ्च लोकतोपि ज्ञायते शब्दा नित्या इति, लोके ह्यर्थमर्थमुपादाय शब्दान् प्रयुञ्जते नैषां निर्वृत्तौ यत्नं कुर्वन्ति, ये पुनर्विनाशिनो भावास्तेषां निर्वृत्तौ नूनं यत्नः क्रियते, यथा घटेन कार्यं करिष्यन् कश्चित् कुम्भकारकुलं गत्वाह–घटं कुरु तेन कार्यं करिष्यामीति, न तद्वच्छब्दान्प्रयुयुक्षमाणः कश्चिद्वैयाकरणकुलं गत्वाह–शब्दान् कुरु प्रयोक्ष्ये इति । अपि च शब्दा-

नुच्चारयतीत्येव प्रचलितो व्यवहारोऽनवरतं जागर्त्ति ननु जातु शब्दान्करोतीति ततोपि शब्दा नित्या इति शब्दविदः । जैमिनीयन्यायमालाकारोप्याह—

विध्यादिरूपो यः शब्दः सोऽनित्योऽथाविनश्वरः ।
अनित्यो वर्णरूपत्वाद्वर्णे जन्मोपलम्भनात् ॥
अबाधितप्रत्यभिज्ञाबलाद्वर्णस्य नित्यता ।
उच्चारणप्रयत्नेन व्यज्यतेऽसौ न जन्यते ॥ इति ।

ननु शब्दनित्यत्ववादिनः शाब्दिकास्तावदेवं वदन्ति वर्णसंघातश्रवणानन्तरम् 'इदमेकं पदम्' इति बोधो मानसप्रत्यक्षेणोत्पद्यते तस्य बोधस्य वर्णव्यतिरिक्तः कश्चिदन्वर्थनामा ( स्फुटत्यर्थोऽस्मादिति ) स्फोटाभिधः पदार्थो विषयः, स च नित्यः, स एव शब्दो न तु वर्णा इति । तदेतन्नैयायिका न क्षमन्ते वर्णेष्वेवैकार्थावच्छेदोपाधिना पदैक्यबुद्धेरुपपत्तौ वर्णभिन्नस्फोटकल्पना हि निरर्थिका स्यात्तस्माद्वर्णानामेव शब्दत्वं, वर्णाश्च प्रतिपुरुषं प्रत्युच्चारणं चोत्पत्तिविनाशशालिनोऽतोऽनित्याः शब्दा इति चेदत्रोच्यते—बहुलैः पुरुषैः प्रत्येकं बहुकृत्व उच्चारिते गोशब्दे त एवेमे गकारादयो वर्णा इत्यबाधितप्रत्यभिज्ञा जायते, तद्बलान्नित्या वर्णास्तस्मान्नित्ये शब्दे कारणदोषाभावान्नास्त्यप्रामाण्यमित्यादियुक्तिभिः शब्दा नित्या इति व्याकरणविदां पक्षो निरवद्य इति विदाङ्कुर्वन्तु विद्वांसोऽलमतिप्रसङ्गेन ।

## ( ५ ) अथ स्फोटः ।

इह हि केचित्कञ्चिद् घटमानयेति ब्रुवते ततस्तस्य घटकर्मकानयने प्रवृत्तिस्तच्छब्दजन्यबोधमन्तरा न स्याच्छाब्दबोधस्तु वृत्तिविशिष्टपदज्ञानाधीनस्तद्धर्मावच्छिन्नविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति तद्धर्मावच्छिन्ननिरूपितवृत्तिविशिष्टज्ञानं हेतुरिति कार्यकारणभावस्य सर्वसम्मतत्वात् । एवञ्च पदवाक्याभ्यां बोधोपपत्तये प्रकृतिप्रत्ययेषु तत्तदर्थबोधकत्वशक्तिप्रतिपादकस्य व्याकरणस्याप्रामाण्यनिराकरणाय च वृत्त्याश्रयत्वेन शब्दस्य निर्णयः कर्त्तुमुचितोऽतः को वृत्त्याश्रयः शब्दः ? प्रत्येकं वर्णा इति चेन्न, द्वितीयादिवर्णोच्चारणवैयर्थ्यापत्तेः । नापि वर्णसमुदायः, क्रमिकाशु-

विनाशिनानावर्णात्मकतयोच्चरितप्रध्वंसित्वेन यौगपद्यासम्भवात् । कस्तर्हि ! स्फोटात्मक इति, नित्यशब्दसाधुत्वज्ञानवतां वैयाकरणानां नयः । ननु कोऽयं स्फोट इति चेच्छृणु चतुर्विधा हि वागस्ति परा, पश्यन्ती, मध्यमा, वैखरी च । तदाह हरिः—

परा वाङ् मूलचक्रस्था पश्यन्ती नाभिसंस्थिता ।
हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा ॥
वैखर्या हि कृतो नादः परश्रवणगोचरः ।
मध्यमया कृतो नादः स्फोटव्यञ्जक उच्यते ॥ इति ।

तत्र मध्यमानादः सूक्ष्मतरः कर्णपिधाने जपादौ च सूक्ष्मतरवायुव्यङ्ग्यः शब्दः शब्दब्रह्मरूपस्फोटव्यञ्जकश्च तादृशमध्यमानादव्यङ्ग्यः स्फोटो ब्रह्मरूपो नित्यश्च । तदाह हरिः—

अनादिनिधनं ब्रह्म शब्दतत्त्वं निरञ्जनम् ।
विवर्त्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥ इति ।

स च स्फुटति व्यक्तीभवत्यर्थोऽस्मादिति व्युत्पत्त्याऽर्थप्रकाशकः प्रकाशश्च ज्ञानं परश्चायं स्फोटशब्दः पङ्कजादिवद् योगरूढः, योगमात्रस्वीकारे वाच्य-लक्ष्य-व्यङ्ग्यानां चेष्टायाश्च व्यङ्ग्यार्थप्रतिपादकत्वेन तत्रातिव्याप्तिः एवञ्चार्थनिष्ठविषयताप्रयोजकशक्तिमान् स्फोट इति पर्यवस्यति ।

स च यद्यप्येकोऽखण्डश्च पदस्फोटो वाक्यस्फोटश्च, तत्रापि वाक्यस्फोटो मुख्यस्तस्यैव लोकेऽर्थबोधकत्वात्तेनैवार्थसमाप्तेश्च, परन्तु जपाकुसुमादिलौहित्यपीतत्वादिव्यञ्जकोपरागवशाल्लोहितः पीतः स्फटिक इति भानवत् मणिकृपाणदर्पणव्यञ्जकोपाधिवशान्मुखे दैर्घ्यवर्त्तुलत्वादिभानवच्च वर्णादिव्यङ्ग्यो वर्णरूपः पदरूपो वाक्यरूपश्च, इदमत्र तत्त्वम्, वर्णस्यैव तत्त्वाभ्युपगमे वर्णस्फोटः पदादीनां तत्त्वाभ्युपगमे पदादिस्फोट इति, तत्र वर्ण–पद–वाक्यभेदेन स्फोटस्त्रिधा तत्रापि जातिव्यक्तिभेदेन पुनः षोढा, अखण्डत्वेन भेदे पदवाक्ययोः सङ्कलनयाऽष्टौ स्फोटा इति व्यवहारः । तत्राखण्डवाक्यस्फोटस्यैव सिद्धान्तसिद्धत्वेन 'पदसमूहो वाक्यमर्थसमाप्तौ' इति न्यायभाष्यकारीयवचनस्वारस्येन च वर्णस्फोटादीनामाकाङ्क्षानिवर्त्तकत्वाभावादवास्तवत्वेपि तेषां स्वीकारः शास्त्रीयप्रक्रि-

यानिर्वाहायेति बोध्यम् । अयम्भावस्तत्र प्रतिवाक्यं सङ्केतग्रहासम्भवाद्वाक्यान्वाख्यानस्य लघूपायेनाशक्यत्वाच्च कल्पनया पदानि प्रविभज्य पदे प्रकृतिप्रत्ययभागांश्च प्रविभज्य कल्पिताभ्यामन्वयव्यतिरेकाभ्यां तत्तदर्थभागं शास्त्रविषयं परिकल्पयन्ति स्माचार्या इति ।

तत्र साधुशब्दान्तर्गता वाचका उत तत्स्मृताः स्थानिन इति विप्रतिपत्तौ स्थानिन एव वाचका न त्वादेशास्तेषां बहुत्वेन शक्त्यानन्त्यापत्तेः । एधाञ्चक्रे ब्रह्मेत्यादावभावरूपस्यादेशलुगादेर्बोधकत्वासम्भवाच्च । लत्वस्य जातिरूपतया शक्ततावच्छेदकत्वौचित्यात्, अव्यभिचाराच्च । आदेशानां भिन्नतया परस्परव्यभिचरितत्वात् । लत्वावच्छिन्नशक्तिग्रहस्य कृतिबोधात् प्राक्नियमेन सत्त्वात्, तिप्त्वादीनां शक्यतावच्छेदकत्वे तु तदवच्छिन्नशक्तिग्रहं विनापि तसादिशक्तिग्रहवत् कृतिबोधेनादेशवाचकतावादिमते हि व्यभिचारो दुर्वारः ।

लः कर्मणीत्याद्यनुशासनानुगुण्याच्चेति नैयायिकास्तन्न पचतीत्यादिषु लकारमविदुषोऽप्यवैयाकरणस्य बोधदर्शनात् । स्थानिनामपि भिन्नभिन्नवैयाकरणैः स्वेच्छया स्वीकृतत्वेन कः शक्तः को नेति व्यवस्थाया असम्भवात् । सर्वेषां शक्तत्वे गौरवाद्व्यभिचारस्य सत्त्वाच्च । लः कर्मणीत्यादेर्लाघवात्कल्पिते लकारे कर्त्रादिवाचित्वं कल्पितमादाय प्रवृत्तेः । न चैवं धनं वनमित्यादौ प्रत्येकवर्णस्यार्थबोधकत्वेन प्रातिपदिकसंज्ञापत्तौ नलोपाद्यापत्तिः समुदायशक्तेरवयवनिष्ठशक्तिजन्यकार्यं प्रति प्रतिबन्धकत्वादत एवाह—

वाक्यस्फोटोऽति निष्कर्षे तिष्ठतीति मतस्थितिः ।
साधुशब्देऽन्तर्गता हि बोधका न तु तत्स्मृताः ॥ इति ।

इत्थमादेशानां वाचकत्वे सिद्धे पदस्फोटोऽपि स्फुट एव, समभिव्याहृतवर्णानां वाचकत्वे सिद्धे तादृशवर्णसमभिव्याहाररूपपदस्य वाचकता सिद्ध्यतीति । स एव हि पदस्फोटो नापूर्वः । प्रतिवर्णमर्थस्मरणस्यानुभवविरुद्धत्वात् । घटशब्दादमुमर्थं प्रत्येमीत्येव लोके प्रतीतेः, स च द्विधा सखण्डोऽखण्डश्च इदमत्र तत्त्वम् ।

पदे वर्णा न विद्यन्ते वर्णेष्ववयवा न च ।
वाक्यात्पदानामत्यन्तं प्रविवेको न कश्चन ॥

इति शाब्दिकनयरीत्याऽखण्डपदस्य वाचकत्वे न कश्चिद्दोषः ।

अथैवं पदस्फोटे निश्चिते वाक्यस्फोटोऽपि मन्तव्य एव तदाह—

हरेऽवेत्यादि दृष्ट्वा च वाक्यस्फोटं विनिश्चिनु ।
अर्थे विशिष्यसम्बन्धाग्रहणं चेत्समं पदे ॥ इति ।

अयम्भावः—'हरेऽव–विष्णोऽव' इत्यादौ पदयोरेकादेशे सति न पद-विभागः सुज्ञानस्तथा च प्रत्येकं पदाज्ञानेपि समुदायशक्तिज्ञानाच्छाब्द-बोधात्समुदायेप्यावश्यकी शक्तिः ।

पदैर्यथा पदार्थबोधः पदार्थशक्तिश्च पदे, तथा वाक्यैर्वाक्यार्थबोधे वाक्यार्थशक्तिर्वाक्येऽभ्युपेया तावतैव वाक्यस्फोटः सिद्ध्यतीत्यवधेयम् ।

अथ प्रथमं पदस्फोटस्य सिद्धौ तदर्थसम्बन्धरूपवाक्यार्थाप्रसिद्ध्या क्व वाक्यशक्तिकल्पनावसर इत्याद्यपरितोषात्पदस्फोटमेव दृष्टान्तीकृत्य वाक्यशक्तिः साधिता वैयाकरणभूषणसारे व्याकरणतत्त्वविद्भिस्तथाहि—पदैः पदार्थबोधवत् वाक्यैर्वाक्यार्थबोध इति पदार्थशक्तिः पदेष्विव वाक्यार्थशक्तिर्वाक्येष्वपि अवश्यमङ्गीकर्त्तव्येति पदवाक्यस्फोटौ व्यवस्थितौ ।

अयम्भावः—यत्र पदोपस्थित्या पदशक्तिग्रहसम्भवस्तत्र पदशक्त्यैव वाक्यार्थबोधो यत्र तदसम्भवो हरेऽवेत्यादौ तत्रागत्या वाक्यशक्त्यैव तद्बोध इति । अत्रायं निष्कर्षः—यद्यपि व्यवस्थावितिपदमहिम्ना पक्षद्वयं व्यवस्थितमिति लभ्यते तथापि आवश्यकवाक्यस्फोटेनैवोपपत्तौ पदस्फोटकल्पनं नावश्यकमिति राद्धान्ते वाक्यस्फोट एव पर्यवस्यति । अन्यथा घटः कर्मत्वमानयनं कृतिरित्यादौ तादृशव्युत्पत्तिरहितस्यापि बोधप्रसङ्गः स्यात् । पदवृत्तिज्ञानजन्यपदार्थोपस्थितेः सत्त्वात् । घटमानयेत्यत्रैव पदार्थानामुपस्थितौ सत्यपि तात्पर्यज्ञाने बाधाभावाच्च । तत्रैव घटकर्मकमानयनमिति बोधे घटार्थकप्रातिपदिकोत्तरं कर्मत्ववाचकविभक्तेस्ततो धातोस्तत आख्यातस्य समभिव्याहारः कारणमिति कार्यकारणभावज्ञानवतो बोधात्तज्ज्ञानमपि हेतुरिति चेत्तर्हि सिद्धो वाक्यस्फोटः ।

वस्तुतस्तु समुदितार्थे विशिष्टवाक्यस्यैव प्रथमं विशिष्टवाक्यार्थबोधः पश्चादावापोद्वापाभ्यां प्रत्येकं तद्ग्रह इति बोध्यम् । इदमेव मीमांसकानां वेदान्तैकदेशिनाञ्च मतं तथा ह्युक्तं भूषणे—

सर्वत्रैव हि वाक्यार्थो लक्ष्य एवेति ये विदुः ।
भाट्टास्तेपीत्थमेवाहुर्लक्षणायाग्रहे गतिम् ॥ इति ।

उत्तरवर्णप्रत्यक्षकाले तस्मिन्नव्यवहितोत्तरत्वसम्बन्धेनोपस्थितपूर्ववर्णवत्त्वं तथा तदुत्तरप्रत्यक्षकाले उपस्थितविशिष्ट तद्वर्णवत्त्वं तस्मिन्सुग्रहमिति तादृशानुपूर्विघटितपदत्वस्येव वाक्यत्वस्यापि सुग्रहत्वमिति सिद्ध्यति वाक्यस्फोटः । अथ तयोरखण्डत्वं 'पदे वर्णा न विद्यन्ते' इत्युक्तदिशा सुस्पष्टं प्रतिभाति । अत्र शक्यत्वस्येव शक्यतावच्छेदिकाया वर्णपदवाक्यानिष्ठजातेर्वाचकत्वम् । आकृत्यधिकरणन्यायेन जातेरेव वाक्यत्ववद्वाचकत्वस्यापि युक्तत्वात्सिद्धो जातिस्फोटः ।

अयं स्फोटो मध्यमानादव्यङ्ग्य इति यदुक्तं तत्र परमं प्रमाणं श्रुतिः पुराणवाक्यञ्च यथा—

चत्वारि वाक्परिमितानि पदानि, तानि विदुर्ब्राह्मणा ये मनीषिणः ।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्तीति ॥

विन्दोस्तस्माद् भिद्यमानाद्रवो व्यक्तात्मकोऽभवत् ।
स एव श्रुतिसम्पन्नः शब्दब्रह्मेति गीयते ॥ इति ।

इत्थं संक्षेपेण विपुलविचारसारनिर्णययोग्यो नित्यः शब्दब्रह्मरूपः स्फोटो निर्णीत इति मन्तव्यं विज्ञैः ।

## ( ६ ) अथ शक्तिः ।

इह खलु सर्वैः शब्दैः श्रूयमाणैरपि सदा समेषां न तदर्थप्रतिपत्तिः । न वा सद्यः, किन्तु कदाचित् शब्दैः केषाञ्चित्स्वल्पचिरेण जन्यते । कल्प्यते च तस्मात्तत्सम्पादिनी पदपदार्थसम्बन्धजनितपदार्थसार्थोपस्थितिरेव । इतरेषां त्वन्वयव्यतिरेकनियमविरहगौरवादिदोषकवलितत्वेन न तत्कल्पनसम्भवः । स च सम्बन्धविशेषः किंस्वरूप इति जिज्ञासूनां तदवधारणार्थं तत्स्वरूपमाह गदाधरः—'सङ्केतो लक्षणा चार्थे पदवृत्तिरिति' वृत्तिरत्र शाब्दबोधौपयिकः सम्बन्धस्तथा च 'इदं पदमिममर्थं बोधयतु' इति । 'अस्माच्छब्दादयमर्थो बोद्धव्य' इति पदविशेष्यिकाऽर्थविशेष्यिका वा इच्छासङ्केतरूपा शक्तिस्तत्राधुनिकसङ्केतः परिभाषा तया चार्थबोधकं पदं पारिभाषिकं यथा शास्त्रकारादिसङ्केतितनदीवृद्ध्या-

दिपदम् । ईश्वरसंकेतः शक्तिस्तया चार्थबोधकं पदं वाचकं यथा गवादिपदमिति न्यायसिद्धान्तः ।

किञ्च सैव सङ्केतः सम्बन्धः, शक्तेर्यद्यपि विपत्वलक्षणः सम्बन्धः पदेऽर्थे बोधे च तथापि बोधनिष्ठजन्यतानिरूपितजनकतावत्त्वेन शक्तिविषयो वाचकः । पदजन्यबोधविषयत्वेन शक्तिविषयो वाच्य इति नातिप्रसङ्ग इति नैयायिकमतं, तन्न सहन्ते शाब्दिकास्तथाहि—इच्छायाः सम्बन्धिनोराश्रयता नियामकत्वाभावेन सम्बन्धत्वासम्भवात् । सम्बन्धो हि सम्बन्धिद्वयभिन्नत्वे सति द्विष्ठत्वे च सत्याश्रयतया विशिष्टबुद्धिनियामक इत्यभियुक्तव्यवहारात् । यथा घटवद्भूतलमित्यादौ संयोगरूपः सम्बन्धः सम्बन्धिभ्यां भिन्नो द्विष्ठो घटनिरूपितसंयोगाश्रयो भूतलमिति विशिष्टबुद्धिनियामकश्च नात्र तथा घटशब्द इच्छावान् तदर्थो वा इच्छावानिति व्यवहारस्तस्मात्पदपदार्थयोः सम्बन्धान्तरमेव शक्तिः वाच्यवाचकभावापरपर्यायेति, तद्ग्राहकश्चेतरेतराध्यासमूलकं तादात्म्यं तदेव सम्बन्धः । सा च शक्तिस्त्रिधा रूढिर्योगो योगरूढिश्चेति वैयाकरणानां सरणिः ।

किञ्च यदा चक्षुरादीनामिन्द्रियाणां स्वविषयचाक्षुषघटादिषु तदीयचाक्षुषादिकारणरूपाऽनादिर्योग्यता समेषां तन्त्रविदां सम्मतोऽस्ति तथा शब्दानामपि स्वार्थैः सह तद्बोधकारणतैव योग्यता वर्त्तते सैव शक्तिरिति । अथाधुनिकदेवदत्तादिपदेऽनादिविशेषणविशिष्टबोधकारणतायाः शक्तेरभावात्ततो बोधो न स्यादिष्यते च बोधोऽतः सङ्केतज्ञानमपि हेतुरिति वाच्यम् । अन्यथा पित्रादीनां सङ्केताज्ञानेपि अन्वयबोधप्रसङ्गः लाक्षणिकेऽतिव्याप्तिश्च तत्राप्यनादिभूतबोधजनकत्वव्यवहारात् । तथा चावश्यकत्वात्स एव शक्तिरस्तु तद्धेतोरेवेति न्यायात् । अलं सङ्केतज्ञानस्य हेतुतां परिकल्प्य विशेषणविशिष्टबोधकारणतायाः शक्तिस्वीकारेण । स चाधुनिके पित्रादेर्गवादौ चेश्वरस्येति यत्केषाञ्चिन्मतं तन्नास्माकं प्रमोदजनकं तथाहि—सङ्केतो न स्वरूपेण ( सङ्केतत्वरूपेण ) हेतुरगृहीतशक्तिकादप्यर्थबोधप्रसङ्गात् । सङ्केतस्य तत्र विद्यमानत्वात् । नापि सामान्यतो ज्ञातः प्रमेयत्वादिनाज्ञानेपि बोधप्रसङ्गात् । राद्धान्ते तु तत्सामान्यज्ञानं नास्माकं बोधजनकमिष्टम् । नापि सङ्केतत्वेन तज्ज्ञानं हेतुर्गवादिपदेष्वपीश्वरादेः सङ्केतत्वेन तज्ज्ञानशून्यानां लौकिकमीमांसकादीनां

तत्तदर्थबोधजनकत्वग्रहवतामेव बोधोदयेन व्यभिचारात् । न चार्थबोधजनकतावच्छेदकत्वेन सङ्केतज्ञानं हेतुस्ततोऽपि लाघवादर्थबोधजनकतात्वेनैव हेतुत्वेऽस्मत्पक्षसिद्धेः ।

न चाधुनिकदेवदत्तादौ सङ्केतज्ञानादेव बोधेनास्य व्यभिचारः, सङ्केतमात्रादर्थबोधस्थलेऽपीदं पदमेनमर्थं बोधयत्वितीच्छाग्रहे पदे तदर्थबोधकत्वस्य विषयीकरणेन व्यभिचाराभावात् । न च स्वातन्त्र्येण बोधकताज्ञानं कारणं वाच्यम्, अन्यथा नेदं तद्बोधजनकमिति ज्ञानवतोऽस्माच्छब्दादयमर्थो बुद्धोऽनेनेति जानतस्तद्ग्रहापत्तेरिति वाच्यं नेदं तद्बोधजनकमिति ग्रहवतो बाधेन पदेऽन्यग्रहं जानतोऽपि तद्ग्रहासम्भवात् । अन्यथा भ्रान्तिज्ञस्यापि भ्रान्तत्वापत्तेः । निर्दिष्टशक्तित्वेनाभ्युपेतमर्थबोधजनकत्वं च पित्रादिसङ्केतज्ञानाद् गृह्यतेऽतस्तज्ज्ञानात् पूर्वं न बोधः । न चैवं लाक्षणिकेष्वनादिभूतबोधजनकत्वव्यवहारात्तदुच्छेदापत्तिरिष्टत्वात् । शक्तिग्राहकव्यवहारस्य मुख्यलक्ष्यसाधारण्यात् । किं च घटादिपदेऽगृहीतशक्तिकस्य प्रत्यक्षाद्युपस्थितघटादिपदाच्छाब्दबोधानुदयादन्वयव्यभिचारेण प्रत्यक्षादिजन्योपस्थितेः शाब्दबोधाजनकत्वाच्छाब्दबोधं प्रति शक्तिजन्योपस्थितेर्लक्षणाजन्योपस्थितेश्च कारणत्वं वाच्यं तथा च कार्यकारणभावद्वयस्य कल्पने गौरवं स्यात्, लक्षणानङ्गीकर्त्तृणामस्माकं पुनः शाब्दबोधं प्रति शक्तिजन्योपस्थितित्वेनैव कारणत्वे लाघवम् । ननु फलमुखगौरवं न दोषायेति रीत्या तत्सोढव्यमिति चेन्न, लक्षणावृत्तिस्वीकारे शक्तिजन्योपस्थितिं विनापि लक्षणाजन्योपस्थिततः शाब्दबोधोदयापत्त्या प्रत्येकं व्यभिचारात् । न च तद्दोषशान्त्यै अव्यवहितोत्तरत्वसम्बन्धेन तत्तदुपस्थितिमत्त्वं कार्यतावच्छेदकं तत्तदुपस्थितित्वं च कारणतावच्छेदकमिति न दोषः, अनन्तकार्यकारणभावप्रसङ्गात् । अपि च पदार्थोपस्थितिं प्रत्यपि शक्तिज्ञानत्वेन लक्षणाज्ञानत्वेन च हेतुतायां व्यभिचारो गौरवञ्च प्राग्वदेव स्यात् । यद्यपि मम मते इदं पदमेतदर्थबोधकमिति शक्तिज्ञानेन सामान्यतः कार्यकारणभावकल्पनेऽपि तत्तदर्थभेदेनानन्तकार्यकारणभावकल्पने गौरवं तत्रापि परस्परव्यभिचारवारणायाव्यवहितोत्तरत्वनिवेशघटितं च गौरवं तुल्यं तथापि परमते सर्वस्याप्येतस्य सत्त्वेन लक्षणाकार्यकारणभावकल्पनारूप-

गौरवस्याधिकस्य सत्त्वेनास्मन्मतमेव साध्विति सुतरां प्रतिभाति ।

अथ शक्तिजन्योपस्थितित्वेनेव वृत्तिजन्योपस्थितित्वेनैव शाब्दबोधे शक्तिज्ञानत्वेनेव वृत्तिज्ञानत्वेन पदार्थोपस्थितौ हेतुतास्वीकारे परमते नोक्तदोप इति वक्तुं शक्यते, शक्तिलक्षणान्यतरत्वस्य शाब्दबोधहेतुपदार्थोपस्थित्यनुकूलपदपदार्थसम्बन्धत्वस्य वा वृत्तित्वस्य कारणतावच्छेदकत्वादस्मदभिमतशक्तित्वमपेक्ष्य निरुक्तान्यतरत्वादेर्गुरुत्वेन गौरवस्य तदवस्थत्वात् ।

अथ शक्तिज्ञानत्वेनैव कारणता शक्यसम्बन्धरूपलक्षणायां शक्तेरपि प्रवेशादिति यत्केषाञ्चिन्मतं तदपि न, शक्तिज्ञानपदार्थोपस्थित्योः कार्यकारणभावे समानविषयत्वस्यावश्यकत्वात् । तदर्थविषयकोपस्थितिं प्रति तदर्थनिरूपिततत्पदनिष्ठशक्तिज्ञानत्वेन कारणताया आवश्यकत्वमिति हि तात्पर्यम् । अन्यथा हि गङ्गातीरयोः सम्बन्धाग्रहवतोपि प्रवाहरूपार्थनिरूपितबोधकत्वशक्तिं गङ्गापदे जानतो 'गङ्गायां घोष' इति वाक्यात्तीरबोधप्रसङ्गः शक्तिज्ञानस्य हेतोः सत्त्वात् । एवञ्च लक्षणोच्छेदापत्तिरिष्टत्वेनैव परिहरणीया । ततश्च तामस्वीकृत्य शक्तिजन्योपस्थितित्वेनैव कारणत्वकल्पनमुचितं तथा ह्युक्तं वैयाकरणभूषणसारे—

> इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा ।
> अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा ॥ इति ।

अथ बोधकत्वस्यैव शक्तित्वे भाषादितो बोधदर्शनाद्बोधकता रूपा शक्तिस्तत्रापि स्यात् । शक्तत्वस्यैव साधुताया व्याकरणाधिकरणे प्रतिपादनात्तेषां साधुत्वमपि किं न स्यादित्याशङ्कायां द्विधा समाधत्ते भूषणकृत्—

गाव्यादिः साधुशब्दमनुमाय वाचको न तु साक्षात्तथा च लिपिवत्तेषां साधुस्मरणे एवोपयोगो न तु बोधकत्वेऽतो न तेषां साधुत्वम् । न च शक्तिग्राहकव्यवहारादेस्तुल्यत्वात् साधुशब्दानामिव तेषामपि साक्षाद्वाचकत्वमिति वाच्यं, तत्तद्देशभेदभिन्नेषु तेषु तेषु शक्तिकल्पने गौरवात् । एवञ्च शक्तत्वस्य साधुत्वे न क्षतिरिति नैयायिकमीमांसकादीनां नयमभ्युपेत्यैवाह—

> असाधुरनुमानेन वाचकः कैश्चिदिष्यते ॥ इति ।

वैयाकरणास्तु—अपभ्रंशानामपि बोधकत्वं, बोधकतारूपा शक्तिश्च त्रास्ति, अशक्तत्वे ततो बोध एव न स्यात्, साधुस्मरणात्ततो बोध इति परेषां मतमयुक्तं तानविदुषां पामराणामपि ततो बोधदर्शनादेवञ्च नापादयः शब्दाः शक्ता एव । न च पर्य्यायतया गणनापत्तिः साधूनामेव कोशादौ विभागदर्शनात् । न चैवं शक्तत्वस्य साधुत्वे सर्वसम्मते भाषाशब्दानामपि बोधकतारूपशक्तेः सत्त्वेन शक्तत्वेन साधुत्वं शाब्दिकमते मातमिति वाच्यं, साधुभिर्भाषितव्यं नासाधुभिरिति विधिनिषेधयोरसत्त्वेन पुण्यजननयोग्यत्वं साधुत्वं पापजननयोग्यत्वमसाधुत्वमिति नियमात्तदाह मूले—

वाचकत्वाविशेषेऽपि नियमः पुण्यपापयोः ॥ इति ।

इत्थं बोधकतारूपा शक्तिर्मन्तव्या सङ्केतज्ञानमपि तत्र हेतुरित्यन्यदित्याहुः ।

## ( ७ ) अथ समासशक्तिः ।

कारणसत्त्वे हि कार्योदयस्य दर्शनेन तद्धर्मावच्छिन्नविषयकशाब्दबुद्धित्वावच्छिन्नरूपकार्यं प्रति तद्धर्मावच्छिन्ननिरूपितवृत्तिविशिष्टज्ञानं हेतुरिति राद्धान्ताद्राजपुरुषादिसमस्तपदेभ्यो बोधस्तद्वृत्तिशक्तिज्ञानाधीन एवातस्तत्र शक्तिः समुदायवृत्तिरवयववृत्तिर्वेति सन्दिहानं प्रति समासेऽतिरिक्तैव समुदायवृत्तिः शक्तिरिति वैयाकरणैः सिद्धान्तितं, तथा हि—कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपासु पञ्चसु वृत्तिषु विशिष्टैव शक्तिस्तत्र समासशक्तिर्निर्णीयतेऽतोऽत्र वृत्तिपदेन समासस्य ग्रहणं बोध्यम् । सा वृत्तिर्द्विधा—एकार्थीभावापरपर्याया जहत्स्वार्था, व्यपेक्षापरपर्यायाऽजहत्स्वार्था च ।

एकार्थीभावश्च—शब्दविशिष्टा काचिच्छक्तिरेव, वैशिष्ट्यञ्च स्वपर्याप्तत्व-स्वघटकविशिष्टत्वोभयसम्बन्धेन, सम्बन्धघटकवैशिष्ट्यञ्च स्वनिष्ठशक्तिज्ञानाधीनज्ञानविषयत्व-स्वभिन्ननिष्ठशक्तिज्ञानाधीनज्ञानविषयत्वोभयसम्बन्धेन । राजपुरुषादिसमासनिष्ठा च राजसम्बन्धिपुरुषत्वावच्छिन्ननिरूपिता शक्तिरतिरिक्ता वैयाकरणमते विद्यते । द्वितीयसम्बन्धनिवेशाल्लक्षणात्मकशक्तौ नातिव्याप्तिरेकार्थीभावपक्षे समुदायशक्त्यैव विशि-

प्राथोपस्थितिसम्भवेऽवयवजन्यस्वार्थोपस्थितेर्नावश्यकता व्यपेक्षायान्तु अजहत्स्वार्थतामन्तरा परस्परमन्वयासम्भवेन वक्ष्यमाणलक्षणलक्षितव्यपेक्षाया असम्भवादवयवेभ्यः स्वार्थोपस्थितेरत्यन्तमावश्यकतेति विशेष इति । हरिरप्याह—

जहत्स्वार्थाऽजहत्स्वार्थे द्वे वृत्ती ते पुनस्त्रिधा ।
भेदः संसर्ग उभयं वेति वाच्यव्यवस्थितेः ॥ इति ।

जहति पदानि स्वार्थं यस्यां सा जहत्स्वार्था, पदे वर्णवद् वृत्ता पदानामानर्थक्यमित्यर्थः । अयम्भावः समासशक्त्यैव राजविशिष्टपुरुषभानसम्भवे न राजपुरुपपदयोरपि पुनस्तद्बोधकत्वं कल्प्यम् । वृषभ—यावकपदेपु वृपादिपदानामिव । अन्यथा राजपदेन विग्रहवाक्य इव ऋद्धस्य राजपुरुष इत्यस्याप्यापत्तिः स्यात् । न जहति पदानि स्वार्थं यस्यां सा अजहत्स्वार्थेति भावः ।

रथन्तरं सामभेदः, शुश्रूषा सेवेति पूर्वस्याः, राजपुरुष इत्यन्तस्या उदाहरणम् । वृत्तौ विशिष्टशक्तिरेव नत्ववयवे रथन्तरं सप्तपर्णः शुश्रूषेत्यादाववयवार्थानुगमाभावात् ।

यत्तु व्यपेक्षावादिनो नैयायिकमीमांसकादयो राजपुरुषादिसमासादौ नातिरिक्ता शक्तिः कल्पकाभावात्, क्लृप्तराजपदादेवार्थोपस्थितिसम्भवे तत्कल्पनस्य गौरवपराहतत्वाच्च । राजपुरुष इत्यादौ राजपदादेः सम्बन्धिनि लक्षणयैव राजसम्बन्धवदभिन्नः पुरुष इति बोधात् । व्यपेक्षात्वं हि समस्तपदानां परस्परसाकाङ्क्षत्वम् । अत एव राज्ञः पदार्थैकदेशत्वान्न तत्र ऋद्धस्येत्यादिविशेषणान्वयः, पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेनेत्युक्तेः सविशेषणानां वृत्तिर्न वृत्तस्य विशेषणयोगो नेत्युक्तेश्चेत्याहुस्तन्न,—

समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत् ।
बहूनां वृत्तिधर्माणां वचनैरेव साधने ।
स्यान्महद्गौरवं तस्मादेकार्थीभाव आश्रितः ॥

इति हरिसिद्धान्तात् । अयम्भावः समासेऽवयवशक्त्यैव निर्वाहे पङ्कजशब्देऽपि पङ्कजनिकर्त्तुरपि योगादेवोपस्थितौ समुदायशक्तिर्न सिद्ध्येत् । तत्रावयवशक्तिवादिमतेऽपि समुदायशक्तिरेव । न च पद्मत्वरूपे-

ापस्थितये सा कल्प्यते इति वाच्यं, राजपुरुषादिपदेऽपि तद्विशिष्टत्वा-
रूपेणोपस्थितये तत्कल्पनावश्यकत्वात् । लक्षणयैव तथोपस्थितिरिति
त् ? पङ्कजपदेऽपि सा सुवचाऽतः समासेऽतिरिक्तैव शक्तिः पङ्कजशब्द-
दिति । यत् 'पदार्थः पदार्थेनान्वेती'ति, 'वृत्तस्य विशेषणयोगो ने'ति च
चनद्वयेन ऋद्धस्येत्यादिविशेषणान्वयो नेति तदपि तुच्छम् ; समासे
कार्थीभावे स्वीकृतेऽवयवानां निरर्थकत्वेन विशेषणान्वयासम्भवात्फ-
लितार्थपरमस्माकम् । युष्माकन्त्वपूर्वं वाचनिकं तदिति गौरवम् । किञ्च
वेशिष्टशक्त्यस्वीकारे धवखदिरौ, निष्कौशाम्बिः, गोरथः, घृतघटः,
गुडधानाः, केशचूडः, सुवर्णालङ्कारः, द्विदशाः, सप्तपर्णः, इत्यादावितरेत-
ादिरूपार्थो वाचनिको वाच्य इति महद्गौरवं स्यात् । तदाह—

चकारादिनिषेधोऽथ बहुव्युत्पत्तिभञ्जनम् ।
कर्त्तव्यन्ते न्यायसिद्धन्त्वस्माकं तदिति स्थितिः ॥
अषष्ठ्यर्थबहुव्रीहौ व्युत्पत्त्यन्तरकल्पना ।
क्लृप्तत्यागश्चास्ति तव तत्किं शक्तिं न कल्पयेः ॥ इति ।

किञ्च समासे शक्त्यस्वीकारे तस्य प्रातिपदिकसंज्ञादिकं न स्यादर्थ-
वत्त्वाभावात् । न चोत्तरसूत्रेण सिद्धिः, तत्रत्यसमासग्रहणस्य नियमार्थ-
त्वात्तेन राज्ञः पुरुष इत्यादिसिद्धिः ।

किम्बहुना शाब्दिकमते समुदायशक्तिस्वीकारादस्ति कृत्तद्धितैकशेप-
समाससनाद्यन्तधातुरूपपञ्चवृत्तिष्वेकार्थीभावरूपसामर्थ्यम् । अत एव
राजपुरुष इत्यादिसमासस्थले पदार्थैकदेशे राज्ञि न ऋद्धस्येत्यादिविशेष-
णान्वयः । पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेनेति व्युत्पत्तेः । अन्य-
था घटत्वगोत्वाद्यन्वयतात्पर्येण नित्या घटो नित्यो गौरित्यादिवाक्यानां
प्रामाण्यापत्तिः स्यात् । न च समासे समुदाये शक्त्या समुदायस्यैवार्थ-
वत्त्वेन तदेकदेशस्यानर्थकत्वेन महादेव इत्यत्र सूत्राप्राप्त्याऽऽत्वं न स्या-
दिति वाच्यं, सूत्रारम्भसामर्थ्याद् भूतपूर्वगतेराश्रयणात्सूत्रप्रवृत्तेः ।

किञ्च रथन्तरं, सप्तपर्णः, शुश्रूषेत्यादाववयवार्थप्रतीत्यभावात्समासा-
दिपञ्चसु विशिष्ट एव शक्तिः । अत एव व्यपेक्षापक्षस्योद्भावनं कृत्वा
'अथाऽस्मिन् व्यपेक्षारूपसामर्थ्ये योऽसावेकार्थीभावकृतो विशेषः स वक्त-
व्य इत्याह भगवान् भाष्यकृत् ।

अत एवार्थवत्सूत्रभाष्ये अर्थवदिति किम् ! अर्थवतां समुदायोऽनर्थकः, दश दाडिमानि, षडपूपाः, कुण्डमजाजिनमित्युदाहृतम् ।

विशिष्टशक्त्यनङ्गीकारे तु राजपुरुषपदयोः प्रत्येकमर्थवत्त्वेऽपि समुदायस्य तत्त्वाभावात्प्रातिपदिकत्वं न स्यात् । उत्तरसूत्रेण तु न सिद्धिस्तस्य नियमार्थत्वात् । अन्यथा सिद्धिं विना तस्य नियमत्वासम्भवात् ।

किञ्च विशिष्टशक्त्यनङ्गीकारे समस्तप्रयोगविलयापत्तिः स्यात् । शक्यसम्बन्धरूपलक्षणाया अप्यसम्भवाल्लाक्षणिकार्थवत्त्वस्याप्यसम्भवेन प्रातिपदिकत्वाभावात् स्वाद्यनुत्पत्तौ 'अपदं न प्रयुञ्जीत' इति भाष्यकृत्सिद्धान्तात् । ननु वृत्तौ विशिष्टशक्तिस्वीकारे वैयाकरण इत्यस्य व्याकरणमधीते इति, पाचक इत्यस्य पचतीति कथं विग्रहो वृत्तिसमानार्थत्वाभावादिति चेन्न,—

आख्यातं तद्धितकृतोर्यत्किञ्चिदुपदर्शकम् ।
गुणप्रधानभावादौ तत्र दृष्टो विपर्ययः ॥

इति सिद्धान्तेनाक्षतेरिति दिक् ।

## ( ८ ) अथ लकाराणां कृतौ शक्तिः कर्तरि वा ।

'सर्वं हि वाक्यं क्रियया परिसमाप्यते' इति राद्धान्तेन समेषां शब्दानां क्रियासमभिव्याहारेणैवार्थबोधजनकत्वात्तत्समभिव्याहृता एव शब्दा अर्थबोधकाः, क्रियावाचकधातोः प्रयोगस्तु तदुत्तरप्रत्ययमन्तरा न सम्भवति, धातोश्च द्वये प्रत्ययास्तिङः कृतश्च तत्र तिङादेशिनां लकाराणां कृतौ शक्तिः कर्तरि वेति वैयाकरणनैयायिकयोर्मतद्वैतं तथा हि—लकाराणां कृतावेव शक्तिर्लाघवान्नतु कर्त्तरि कृतिमतो व्यापारवतो वा कर्तृत्वेन तत्र लकाराणां शक्तावनेककृतिव्यापाराणां शक्यतावच्छेदकत्वे गौरवात्, कृतित्वजातेः शक्यतावच्छेदकत्वे च लाघवात्, पचतीत्यस्य पाकं करोतीति विवरणदर्शनेन पच्धातुप्रतिपाद्यस्य पाकशब्देनाख्यातप्रतिपाद्यस्य यत्नार्थककरोतिना विवरणेन विव्रियमाणस्याप्याख्यातस्य यत्नार्थकत्वावश्यकत्वाच्च । आख्यातस्य वाचकत्वमादेशिस्मरणद्वारेत्यपि तत्र मते इत्यन्यदेतत् । देवदत्त इत्यादिप्रथमान्तपदेन समभिव्याहृतेन कर्त्तुर्लाभाच्च ।

किञ्च 'पीनोऽयं देवदत्तो दिवा न भुंक्ते' इत्यत्र पीनत्वानुपपत्त्या रात्रिभोजनाक्षेप इति मूलिकया 'येन विना यदनुपपन्नं तेन तदाक्षिप्यते' इति युक्त्याऽत्रापि कृतेः कर्त्तारं विना सर्वथाऽनुपपत्त्या कर्त्तुराक्षेपेण लाभात्। 'अनन्यलभ्यो हि शब्दार्थ' इति सार्वजनीनप्रसिद्ध्योक्त्यानन्यलभ्यकृतावेव शक्तेरौचित्याच्च। प्रकृत्यर्थप्रत्ययार्थौ सहार्थं ब्रूतस्तयोः प्रत्ययार्थः प्रधानमिति न्यायानुरोधेनाख्यातार्थे धात्वर्थो विशेषणम्। आख्यातार्थस्तु प्रथमान्तार्थे विशेषणम्। अनुकूलत्वमाश्रयत्वञ्च संसर्गस्तथा च देवदत्तः पचतीत्यादौ विक्लित्यनुकूलव्यापारानुकूलकृत्याश्रयो देवदत्त इति बोधः। न च रथो गच्छतीत्यादौ रथस्याचेतनत्वाद् यत्नशून्यत्वेन ततो बोधानापत्तिरिति वाच्यमगत्या तत्र तत्र व्यापारे तदाश्रयत्वे वा लक्षणाऽङ्गीकारादिति तार्किका वदन्ति, तन्न मन्वते शाब्दिकाः। यद्यप्यत्रादेशिस्मरणकल्पनाभावरूपलाघवादिति युक्तेः प्रयोगान्तर्गततयाऽऽदेशानां नियतत्वाच्च वैयाकरणैरादेशानां वाचकत्वं स्वीकृतं, लकाराणां कृतावेवेत्युक्त्या नैयायिकैः स्थानिनां यद्वाचकत्वं प्रतिपादितं, तद्युक्तिभिर्निराकृतं तैरतः प्रथमोपात्तत्वात्प्रथमं स्थानिनां वाचकत्वमुताऽऽदेशानामित्यत्रैव विचारः कर्त्तु योग्यस्तथापीह कर्त्तरि शक्तिर्न तु कृताविति शाब्दिकनयं व्यवस्थापयितुं तदनादृत्य कर्त्तरि शक्तिरिति विचार्यते तथाहि—पचतीत्युक्ते पाककर्त्ता क इत्याकाङ्क्षायाः सत्त्वात्तदनुरोधेन कर्त्तरि शक्तेरौचित्यं प्रतिभाति, इति सगर्वमुच्चैर्वदन्ति व्याकरणतत्त्वविदः। किञ्च तार्किकाणां नये पचन्तं चैत्रं पश्य, पचते देवदत्ताय देहि, पचमानस्य देवदत्तस्य द्रव्यमित्यादौ शतृशानजादीनामपि तिबादिवल्लादेशत्वाविशेषेण पचतीत्यादिभ्य इव तेभ्योऽपि कृतिमात्रबोधापत्तिः। न चेष्टापत्तिराश्रयाश्रयिभावेन कर्मणि सम्प्रदाने च कृतेरन्वयात्। पाकानुकूलकृत्याश्रयं चैत्रं पश्येत्याद्यर्थाङ्गीकारेऽदोषादिति वाच्यं, भेदसंसर्गावच्छिन्ननामार्थनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबुद्धित्वावच्छिन्नं प्रति प्रत्ययजन्योपस्थितिः कारणमिति कार्यकारणभावमूलकनामार्थयोरभेदातिरिक्तः सम्बन्धोऽव्युत्पन्न इति स्वपरसिद्धान्तव्युत्पत्तिभङ्गापत्तेः। कृतौ शक्तिरिति मते तु पाकानुकूलाकृतिः कस्मिन् कस्य वेत्याकाङ्क्षा स्यात्। न च कर्त्तरि शक्तावेककर्त्तृका पचिक्रियेति शाब्दबोध[illegible]

[illegible] INSTITUTE OF ADVA[illegible]
Acc. No. 65...5

काङ्क्षा नोपपद्यत एवेति वाच्यं कर्त्तृसामान्यबोधे सति क इति कर्त्तृविशेषाकाङ्क्षायां बाधकाभावात्।

यत्तु देवदत्तकर्त्तृका पचिक्रियेत्युक्तेषु कस्मिन्नस्ति कस्य वेत्याकाङ्क्षा वैयाकरणानां मतेपि दुर्वारैवेति तन्न, विक्लित्यनुकूलव्यापारस्यैव पचिक्रियात्वात्तदाश्रयस्य देवदत्तस्य कर्त्तृत्वात् क्रियाश्रयत्वे निश्चिते कस्मिन्नित्याकाङ्क्षाया अप्रवृत्तेः। फलमुखगौरवस्य दोषानाधायकत्वेन नामार्थयोरभेदसंसर्गान्वयबोधकव्युत्पत्त्यनुरोधेन च शत्रादीनां कर्त्तरि शक्तिस्तिवादीनां कृतावेवेति वक्तुं न शक्यते तार्किकैरादेशानां बहुत्वेन तेषां वाचकत्वे गौरवाल्लाघवात् स्थान्येव वाचक इति हि तेषां सरणिः। एवञ्च तिवादीनां शत्रादीनां च स्थानिस्मारकतया लिपिस्थानीयत्वं बोधकस्तु लकार एव स च शत्राद्यन्ते कर्त्तरि शक्तस्तिबाद्यन्ते कथं कृतिं बोधयेत्। अन्यायश्चानेकार्थत्वमिति न्यायात्। शानजादौ कृतिर्लकारार्थ आश्रयः शानजर्थ इत्यस्तु कर्त्तरि कृदित्यनुशासनादिति तु सर्वथाऽयुक्तं स्थान्यर्थाभिधानसमर्थस्यैवादेशत्वमिति न्यायात्। स्थान्यर्थेन निराकाङ्क्षतया शानजादौ कर्त्तरीत्यस्याप्रवृत्तेः। अनाकाङ्क्षेपि शास्त्रप्रवृत्तौ घञादावपि प्रवर्त्तेत। किञ्च भावे कर्मणि च शानचो दौर्लभ्यात् 'शय्यमाने आस्यमाने चायं गतः' इति भावे क्रियमाण इति कर्मणि प्रयोगो न स्यादेव। किञ्च शक्तिग्रहं व्याकरणोपमानेति प्राचीनोक्त्याऽर्थविशेषपुरस्कारेणैव साधुत्वस्य भाष्यसम्मतत्वेन पदसमयपरिपालनाय व्याकरणं प्रवृत्तमिति न्यायभाष्योक्त्या च शक्तिग्राहकमेव व्याकरणं न तु साधुत्वमात्रार्थकमेवञ्च यदाह व्याकरणं तदस्माकं प्रमाणं तार्किकैरपि तन्मन्तव्यमेव, एवं सति 'लः कर्मणि च भावे चाकर्मकेभ्य' इति सूत्रं कर्त्तरि लकारशक्तिं ग्राहयति तत्र हि कर्त्तरि कृदित्यतश्चकारेण कर्त्तरीत्यनुकृष्यते बोधकतारूपां तिवादिशक्तिं तत्स्थानित्वेन कल्पिते लकारे परिकल्प्य लकाराः कर्मणि कर्त्तरि च तेन विधीयन्ते नकारविसर्गादिनिष्ठां कर्मकरणादिबोधकताशक्तिमादाय शसादिविधावत्। इत्थं शक्तिग्राहकशिरोमणिभूतेन व्याकरणेन बोधितायाः कर्त्तरि लकारशक्तेस्त्यागे तव को हेतुरिति नैयायिकः प्रष्टव्यो बीजाभावात्कृतौ लकारशक्तिवादी तार्किको दण्डभाक् किन्न स्यात्?

यत्तु तार्किकाः पक्ता देवदत्त इत्यादावभेदान्वयोपपत्तये कर्त्तरि कृदित्यत्र कर्त्तृपरत्वेन क्लृप्तस्यापि कर्त्तृपदस्य लाघवरूपविनिगमकसद्भावेन प्रकृते शब्दाधिकाराश्रयणेन 'द्व्येकयोर्द्विवचनैकवचने' 'ब्रह्मणो जानपदाख्यायाम्' इत्यादौ भावप्रधाननिर्देशस्य सूत्रकृच्छैलीसिद्धत्वेन धर्मपरत्वेऽपिस्वारस्यानुमानेन लः कर्मणीत्यत्र चकारानुकृष्टकर्त्तृपदस्य कर्त्तृत्वपरात्कृञो यत्नवाचकत्वेन तत्प्रकृतिककर्त्रर्थतृजन्तकर्त्तृशब्दस्य कृत्याश्रयवाचकतया तदुत्तरभावप्रत्ययेन प्रकृत्यर्थप्रकारीभूतधर्मबोधनात् कर्त्तृपदस्य प्रकृते कृत्यर्थकत्वेन कृतौ लकाराणां शक्तिरित्यत्र न शक्तिग्राहकं व्याकरणं प्रतिकूलं ममेति तन्न शब्दाधिकारस्यानेकशक्तिकल्पनादूषितत्वेन गौरवपराहतत्वात्। 'अतो गुणे' इत्यतोऽत इत्यनुवृत्त्यैव सिद्धे 'अव्यक्तानुकरणस्यातः' इति सूत्रेऽत इति करणेन शब्दाधिकारस्य प्रमाणसापेक्षत्वसूचनाच्च। 'ष्णान्ताः षडि'ति सूत्रे 'न चान्यार्थं प्रकृतमनुवर्त्तनादन्यद् भवति' 'नहि गोधा सर्पन्ती सर्पणादहिर्भवति' इति भाष्योक्त्या शब्दाधिकारस्यावहेलनाच्च।

अस्तु वाऽर्थाधिकारः, मास्तु वा, 'कर्त्तरि शक्तिस्वीकारेऽपि व्यापाराश्रयस्य कर्त्तृत्वेन व्यापारस्य धातुलभ्यत्वान्न लकाराणां तदंशे शक्तिरनन्यलभ्यो हि शब्दार्थ' इति न्यायात्, तस्यान्यलभ्यत्वात्। एतेन कृतिमतो व्यापारवतो वा कर्त्तुः शक्यत्वेऽनेककृतिव्यापाराणां शक्यतावच्छेदकत्वकल्पने गौरवमिति नैयायिकाद्युक्तं दूषणमज्ञानविजृम्भितमिति सूचितम्। रथो गच्छति जानातीत्यादावगत्या व्यापारे तदाश्रये वा लक्षणायां लक्ष्यतावच्छेदकत्वस्येव शक्यतावच्छेदकत्वस्यापि गुरुणि स्वीकारे बाधकाभावाच्च।

यत्तु शतृशानचोः कृतिवाचकत्वे 'पचन्तं चैत्रं पश्य' 'पचमानो देवदत्त' इत्यादौ सर्वानुभवसिद्धाभेदान्वयबोधानुपपत्त्या तयोः कर्त्तृवाचकत्वं लडादेशत्वबोधनफलं तु धात्वर्थे वर्त्तमानत्वप्रतीतिरेव लकाराणां तु कृतिवाचकत्वमेवेति तदपि तुच्छम्,—

तरबाद्यन्ततिङ्न्त्वस्ति नामता कृत्स्विव स्फुटा।
नामार्थयोरभेदोऽपि तस्मात्तुल्योऽवधार्यताम्॥

इति युक्तेस्तथाहि—'पचतितरां मैत्र' इत्यादौ नामार्थत्वाभेदान्वययोः सम्भवात् कृतिस्त्वव तिङां लकाराणां वा कर्तृवाचकत्वावश्यकत्वात्।

किञ्च लकाराणां कृतौ शक्तिरित्यभ्युपगच्छतां मते युष्मदस्मदोर्लकारेण सामानाधिकरण्याभावात् 'युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः'–'अस्मद्युत्तमः' इत्याभ्यां सूत्राभ्यां सामानाधिकरण्यप्रयुक्ता पुरुषव्यवस्था न स्यात्, कर्त्तुर्वाच्यत्वे तु सुष्ठूपपद्यतेऽतः पुरुषव्यवस्थापि तिङां कर्त्तुर्वाच्यत्वे प्रमाणम्। अभिहिते प्रथमा कर्त्तरीति शेष इत्यादिकं च मन्मतेऽनुकूलं कथं कर्त्तुरवाच्यत्वे भवन्मते सङ्गच्छेत!। तथा च तत्प्रामाण्येन 'पाचको देवदत्त' इत्यादाविव 'देवदत्तः पचती'त्यादावपि 'युष्मद्युपपदे' इति सूत्रानुवादबोधितसूत्रकृदनुभवसिद्धसामानाधिकरण्यानुभवेन कर्त्तुर्वाच्यत्वं निर्दुष्टम्।

किञ्चाख्यातस्य कृतिवाचकत्वेऽभिधानानभिधानव्यवस्थोच्छेदापत्तिस्तथा च चैत्रः पचतीत्यादावपि तृतीयापत्तिर्दुर्वारा, न चानभिहिते इति सूत्रस्यानभिहितसङ्ख्याके इत्यर्थवर्णनेन तत्रादोषः, कृत्तद्धितसमासैः सङ्ख्याभिधानस्याप्रसिद्धत्वात्। ततश्च पक्तव्यस्तण्डुलः, शत्यः शतिकोऽश्वः, प्राप्तोदको ग्रामः, इत्यादिषु कर्मणि द्वितीयेत्यस्य प्रवृत्तौ प्रथमा न स्यात्। पक्ता देवदत्त इत्यादौ तृतीयापत्तिश्च स्यात्। न च कर्तृकरणयोरित्यत्राप्युक्तरीत्या भावप्रधाननिर्देशमाश्रित्य कृतावनभिहितायां तृतीयेत्यर्थकरणे चैत्रः पचतीत्यादौ तिङाविशेष्यतया पक्ता चैत्र इत्यादौ कृताविशेषणतया च कृतेरभिधानान्न पचति चैत्र इत्यादौ पक्ता चैत्र इत्यादौ च कर्त्तुर्वाच्यत्वानभ्युपगमे तृतीयापत्तिरिति वाच्यं क्रियते घटश्चैत्रेणेत्यादावपि तन्मते करोतेः कृतिवाचकत्वाविशेषेण धातुना कृतेरभिधानेन तृतीयानुपपत्तेः। अभिधानं तु तिङ्कृत्तद्धितसमासैरिति परिगणनस्य जागरूकतया धातुनाऽभिधानेऽपि न तत्र दोष इति न विदुषां सन्तोषजनकम्। 'विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसांप्रतम्' 'क्रमादमुं नारद इत्यबोधि सः' इत्याद्यनुरोधेन तस्योपलक्षणत्वादत एव मूले प्रायेणेति संगच्छते। किञ्च रथो गच्छति, तण्डुलः पच्यते स्वयमेवेत्यादौ चाचेतने रथादौ कृतेर्बाधिततयाऽगत्या तत्र तत्र व्यापारे आश्रये वा लक्षणाया

अवश्याभ्युपेयत्वेन तत्र तिङा कृतेरनभिधानेन रथादेस्तृतीयापत्तिर्दुर्वारा । कर्तृकरणयोरित्यत्र कर्तृपदस्य कृत्याश्रयोभयपरत्वेनानभिहिते आश्रयेऽनभिहितायां कृतौ च तृतीयेत्यर्थस्तु गौरवादिदोषदूषितत्वेन दुर्वच इति न तावता रथादेस्तृतीया वारयितुं शक्या । किञ्च कर्त्तरि कृदिति यत्कर्तृग्रहण तदेव लः कर्मणीति सूत्रे चकारेणानुकृष्यते इति कथं 'ण्वुलादीनां लकारादीनां च शक्तौ वैलक्षण्यम् ।' शब्दाधिकारमभ्युपेत्य स्वीक्रियेत चेल्लाघवादेवात्रार्थाधिकारः । कृतामपि कृतिर्वाच्या च स्यात् । न च केवलकृतौ प्रयोगाभावः, आख्यातेऽपि समत्वात् । अभेदसंसर्गान्वयानुरोधस्तु न, उक्तोत्तरत्वात् ।

ननु पचति रूपं देवदत्त इत्यादौ समुदायस्य नामत्वेऽपि तिङ्प्रत्ययो न नामेति न तिङन्तेऽभेदान्वयानुरोधो लकाराणां कर्त्तुर्वाच्यत्वे हेतुरिति चेत्? पाचकः, पचमान इत्यादावपि अक इति शानजित्येतन्न नामेति तुल्यं ततश्चात्र प्रशस्तपाककर्त्ता देवदत्त इत्याद्यभेदान्वयो भवद्भिरभ्युपगन्तव्य इति तिङ्स्वपि कर्त्तुर्वाच्यता स्वीकर्त्तव्यैव । किञ्च फलव्यापारौ धात्वर्थः, लकाराणां कृतौ शक्तिरिति वदतो नैयायिकस्य व्याघातः कृतेरपि व्यापारविशेषतया प्रायेण धातुत एव लाभात् । किञ्च कृतेर्वाच्यत्वे सौकर्यातिशयद्योतनेऽकर्मकात्पच्धातोर्भावे लकारे पच्यते ओदनेनेत्यादौ कर्मवद्भावेन ओदनपदाद्द्वितीयापत्तिः परत्वात्तृतीयेति न, अतिदिश्यमानधर्मविरुद्धस्वाश्रयकार्यस्यातिदेशस्वभावविरुद्धत्वात् । राद्धान्ते कर्त्तुर्वाच्यत्वे लकारवाच्य एव कर्त्ता कर्मवदित्यर्थे भावे प्रत्यये च कर्त्तुर्लकारेणानुपस्थितेरदोषः । अत एव कृत्यक्तखलर्थाः कर्मकर्त्तरि न भवन्ति । तार्किकमते तु कर्त्तुः कुत्रापि लकारवाच्यत्वाभावेन तदर्थस्यैवाभावः स्यात् । पाचक इत्यस्य पचतीति विवरणं च न स्यात्, असमानार्थत्वात् । कृतित्वं शक्यतावच्छेदकमाश्रयत्वञ्च लक्ष्यतावच्छेदकं कृतिश्च शक्यतावच्छेदिकेति गौरवम् । आश्रयवाचकत्वे सर्वत्राश्रयत्वमेव शक्यतावच्छेदकमिति प्रत्युत कर्त्तुर्वाच्यत्ववादिनो मम शाब्दिकस्यैव लाघवम् ।

किञ्च लकाराणां कृतिवाचकत्वे कालस्य कृतौ क्वचिच्चाचेतने कर्त्तरि व्यापारे वाऽन्वयः, एवञ्च परस्परजन्यशाब्दबोधे व्यभिचारवारणायाव्य-

वहितोत्तरत्वादिप्रवेशेन नानाकार्यकारणभावकल्पने गौरवम्। आश्रयवा-चकत्वे तु सर्वत्र व्यापार एव कालान्वयेनैक एव कार्यकारणभाव इत्यति-लाघवम्। एवमाख्यातार्थसंख्यायास्तन्मते समभिव्याहृतप्रथमान्ता-एवान्वयाद्देवदत्तो भुक्त्वा व्रजतीत्यादौ क्त्वार्थे संख्यान्वयवारणायेतर-विशेषणत्वघटितः कार्यकारणभावः कल्प्यस्तत्रेतरत्वेन जगतः प्रवेशान्म-हद्गौरवं मम तु न तथा। उक्तरीत्या विवरणानुरोधेन कृतिवाचकत्व-लकाराणां यदुक्तं तदपि रथो गमनं करोति बीजेनाङ्कुरः कृत इत्यादावचे-तने कृतेर्बाधेन करोतेर्यत्नार्थकताया असिद्धेः परास्तम्। किञ्चैवं ज्ञायते घटः स्वयमेवेतिवत् क्रियते घटः स्वयमेवेत्यपि न स्यात्।

किञ्च करोतेर्यत्नार्थकत्वे यत्नवाचकत्वाविशेषेण घटे यतते इतिवत् कटे करोतीत्यपि स्यात्। लक्षणादिना निर्वाहस्तु गौरवेण पराहन्तव्यः प्रत्ययार्थप्रधानबोधिकायायुक्तेरजेत्यादौ व्यभिचरितत्वेनासार्वत्रिकत्वात् भावप्रधानमाख्यातमिति यास्कवचनेन बाधितत्वाच्च। इत्येतावतीभिर्यु-क्तिभिर्लकाराणां कर्त्तरि शक्तिर्न तु कृताविति शाब्दिकानां विचारसरणि-र्युक्तियुक्तेत्यलम्।

## ( ९ ) अथ धात्वर्थः।

इहावनौ व्यवहारप्रवर्त्तकेषु प्रत्यक्षानुमानोपमानशब्देषु प्रमाणेषु प्रधा-नभूतः शब्द एव, वयन्तु स्वत एव शब्दप्रमाणकाः, यच्छब्द आह तदस्मा-कं प्रमाणं स च शब्दो धातुप्रकृतिकोऽतो धात्वर्थः क इति सर्वेषां कोवि-दानामन्तेवासिनाञ्च हृदम्बुजे नितरामाकाङ्क्षा समुदेतीति संक्षेपेण धा-त्वर्थः स्वमते निर्णीयते—

फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः।
फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम्॥

अयम्भावः फलानुकूलो यत्नसहितो व्यापारो धात्वर्थः, फलत्वञ्च— 'तद्धात्वर्थजन्यत्वे सति कर्त्तृप्रत्ययसमभिव्याहारे तद्धात्वर्थनिष्ठविशेष्यता-निरूपितप्रकारतावत्त्वम्'। विभागजन्यसंयोगादिरूपे पतत्यादिरूपधात्वर्थे विभागसंयोगयोर्विभागस्य फलत्ववारणाय सत्यन्तोपादानं संयोगे तद्वार-णाय प्रकारतावत्त्वान्तम्। तेन वृक्षात्पर्णं भूमौ पततीत्यादौ विभागाश्र-

यस्य वृक्षादेः संयोगाश्रयस्य भूम्यादेश्च न कर्मत्वम् । कर्मप्रत्ययसमभिव्याहृते तु फलस्य विशेष्यता । व्यापारत्वं च—'पदान्तरसमभिव्याहाराप्रयोज्यसाध्यत्वप्रकारकाभिधानविषयत्वम्' ।

घटं करोतीत्यादौ कृञ्समभिव्याहारे घटादीनामपि साध्यत्वेन प्रतीतेरतिप्रसङ्गवारणाय पदान्तरसमभिव्याहाराप्रयोज्येति प्रतीति विशेषणं तदसमभिव्याहारे तेषां साध्यत्वेनाप्रतीतेः । अधिश्रयणाद्यधःश्रयणपर्यन्तक्रियाकलापस्य पदान्तरसमभिव्याहारमन्तरेणापि साध्यत्वेन प्रतीयमानत्वादुक्तव्यापारत्वमविकलमिति तदवच्छिन्ने पच्यादिधातुवाच्यता नानुपपन्नेति लक्षणसङ्गतिः । उक्तञ्च वाक्यपदीयेऽपि—

यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते ।
आश्रितक्रमरूपत्वात्सा क्रियेत्यभिधीयते ॥ इति ।

अथवा 'धात्वर्थफलजनकत्वे सति धातुवाच्यत्वं' व्यापारत्वम् । अनुकूलत्वं संसर्गः, अनुकूलत्वञ्च—'फलनिष्ठजन्यतानिरूपितजनकत्वम् । भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानीति निरुक्तोक्तेर्व्यापारविशेष्यको हि बोधः । साध्यत्वेन प्रतीतौ प्रमाणञ्च—पचति, करोतीत्यादिषु क्रियान्तराकाङ्क्षाया अदर्शनम् । घञादिघटितेषु पाकः, कृतिरित्यादिषु क्रियान्तराकाङ्क्षाया दर्शनमेव । साध्यत्वं हि—'क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकधर्मवत्त्वम्' सिद्धत्वञ्च—'यद्धर्मवत्ताज्ञानात् क्रियान्तराकाङ्क्षोदयस्तादृशज्ञाने प्रकारतयावच्छेदकं यत्तत्त्वम्' । साध्यत्वस्यासत्त्वभूतत्वमपरपर्यायः । उक्तञ्च वाक्यपदीये—

असत्त्वभूतो भावश्च तिङ्पदैरभिधीयते ॥ इति ।

साध्यत्वेन प्रतीयमानस्य व्यापारस्य फूत्कारादितत्तद्रूपेण वाच्यत्वेपि न नानार्थतापत्तिः, नानार्थत्वञ्चाऽननुगतनानाधर्मावच्छिन्नशक्तिनिरूपकतावच्छेदकैकधर्मवत्त्वं, तदादिन्यायेन दोषाभावात् । आख्यातक्रियैकत्वव्यवस्थापि सङ्कलनरूपबुद्धिविशेषात्मकावच्छेदकैक्यस्वीकारेण निर्वहति ।

नागेशास्तु—फलव्यापारयोर्द्धातोः पृथक्शक्तावुद्देश्यविधेयभावेनान्वयापत्तिस्तयोः स्यात्, पृथगुपस्थितयोस्तथान्वयस्यौत्सर्गिकत्वात् । किञ्चैकपदे व्युत्पत्तिद्वयकल्पनेऽतिगौरवम् । तथाहि—फलविशेषणकव्यापारबोधे

कर्त्तृप्रत्ययसमभिव्याहृतधातुजन्योपस्थितिर्हेतुर्व्यापारविशेषणकफलबोधे कर्मप्रत्ययसमभिव्याहृतधातुजन्योपस्थितिर्हेतुरिति कार्यकारणभावद्वयकल्पनं धातोरर्थद्वये शक्तिद्वयकल्पनञ्चेति महद्गौरवमतः फलावच्छिन्ने व्यापारे व्यापारावच्छिन्ने फले धातूनां शक्तिः कर्त्तृकर्मार्थकतत्तत्प्रत्ययसमभिव्याहारश्च तत्तद्बोधे नियामक इत्याहुरियं शाब्दिकानां सरणिः ।

यत्तु मीमांसकाः विक्लित्यादिफलमेव धात्वर्थो व्यापारः प्रत्ययार्थः बहूनां धातूनां तत्र शक्तिकल्पनापेक्षयाऽल्पानां प्रत्ययानां तत्कल्पने लाघवादिति तन्न, पचति पक्ष्यति पक्कवानित्यादौ फूत्कारादिप्रतीतये तत्रानेकप्रत्ययानां शक्तिकल्पनापेक्षयैकस्य धातोरेव शक्तिकल्पनाया औचित्यात् । लः कर्मणीत्यादिसूत्रविरोधापत्तेश्च । नहि तेन व्यापारस्य प्रत्ययार्थता लभ्यते । फूत्कारादेः प्रत्ययार्थत्वे गच्छतीत्यादौ तत्प्रतीतिवारणाय तद्बोधे पचिसमभिव्याहारस्यापि कारणत्वकल्पनेनातिगौरवाच्च । सकर्मकाकर्मकव्यवहारोच्छेदापत्तेश्च । यदपि पचतीत्यत्राख्यातस्य भावनार्थककृधातुना विवरणाद् व्यापारे तिङ्स्थानिभूतलकाराणां शक्तिः । यद्यपि पचतीत्यत्र पाकानुकूलव्यापारवतः कर्त्तुरपि विवरणविषयत्वमस्ति तथापि पचतीत्यत्र कर्त्तुर्विवरणं पचतीत्यस्य पाकं करोतीत्यशब्दार्थकर्मत्वविवरणवत्तात्पर्यार्थविवरणं न तदर्थनिर्णायकम् ।

अपि च लक्षणया कर्त्तुरुक्तत्वान्न तत्र तिङां शक्तिरिति तन्न, पचतीत्यत्र भावनार्थककृधातुना विवरणवत् पचति–पाकं करोतीति कर्त्तृविवरणस्यापि संभवात् । कर्त्तुर्विवरणं तात्पर्यार्थविवरणमिति भावनायामपि तुल्यं, तत्रापि भावनाया विवरणं तात्पर्यार्थविवरणमिति वक्तुं शक्यत्वात् । किञ्चैवं कृत्प्रत्ययानां कर्त्तृकर्मादिवाचकत्वं न संभवेत्तत्रापि कर्त्तरि कृदित्यस्य सम्बन्धेन कर्त्तृत्वं कृतिरिति वक्तुं शक्यत्वात् । अपि च कृतामिव तिङामपि कर्त्तृवाचकत्वं तैः स्वीकार्यमिति विपरीतापत्तिः स्यात् । किञ्च फलस्य धातुनाऽऽश्रयस्य च तन्नये आक्षेपेणैव लाभसंभवेन लः कर्मणीत्यस्य वैयर्थ्यापत्तिः स्यात् । किञ्च भावविहितघञादीनां व्यापारवाचकत्वे ग्रामो गमनवानित्याद्यापत्तिस्तद्वाचकत्वे तेनापि स्वाश्रयाक्षेपे कर्त्तुरभिधानापत्तिः ।

नैयायिकानां मते फलव्यापारौ धात्वर्थ इत्यत्र न काचिद्विप्रतिपत्तिः, प्रत्ययार्थे मतभेदः वैयाकरणानां नये हि लकाराणां कर्त्तरि शक्तिस्तन्नये कृताविस्यवधेयम् ।

किञ्च मीमांसकानां मते प्रत्ययार्थव्यापारव्यधिकरणफलवाचकत्वं सकर्मकत्वं, तत्समानाधिकरणफलवाचकत्वमकर्मकत्वम् । प्रत्ययार्थव्यापाराश्रयत्वं कर्तृत्वम् । तेन घटं भावयतीत्यादौ णिजर्थव्यापारव्यधिकरणफलाश्रयत्वेन कर्मत्वमिति न सकर्मकत्वाकर्मकत्वव्यवहारोच्छेदापत्तिः । न च व्यापारेणाश्रयाक्षेपात्कर्त्तुरभिधानं कर्माख्याते च प्रधानेन फलेन स्वाश्रयाक्षेपात्कर्मणोऽभिधानमिति वाच्यं, जातिशक्तिवादे जात्याक्षिप्तव्यक्तेरिवाश्रयप्राधान्यापत्तौ क्रियाप्रधानमाख्यातमिति यास्कोक्तिविरोधापत्तेः । किञ्चैवं लः कर्मणीति विरोधापत्तेश्च ।

अथाऽस्ति-भवति-वर्तति-विद्यतीनामर्थः सत्ता, सा चानेककालस्थायिनीति कालगतपौर्वापर्येण क्रमवतीति तस्याः क्रियात्वं जानातेर्विषयतया ज्ञानं फलम्, आत्ममनःसंयोगो व्यापारः, आत्मात्रान्तःकरणं मनस्तद्वृत्तिविशेषरूपम् । इच्छतेरिच्छानुकूलं ज्ञानमर्थः, अतीतानागतयोरपि बुद्ध्युपारोहात् फलशालित्वं पतिर्गमिवत्सकर्मको नरकं पतित इत्यादि–प्रयोगादित्थं यथायथं बोध्यमित्यलम् ।

## ( १० ) अथ व्यापारमुख्यविशेष्यकः शाब्दबोधः ।

इह लोके शब्दशक्तिग्रहवता केनचिदुत्तमवृद्धेन मध्यमवृद्धमुद्दिश्य घटमानयेत्युक्ते घटानयनप्रवृत्तं तं बुध्वाऽगृहीतशक्तिकस्तटस्थः कश्चिदस्य वाक्यस्य कम्बुग्रीवादिमद्वस्त्वानयनमर्थ इति प्राक् प्रतिपद्यते, पश्चाद् घटं नय, पटमानयेत्यादावन्वयव्यतिरेकाभ्यां घटशब्दस्य कम्बुग्रीवादिमानर्थ आनयनशब्दस्याहरणमर्थ इत्यवधारयतीत्ययमेव बोधः शाब्दबोधशब्देन व्यवह्रियते । स च 'सर्वं हि वाक्यं क्रियया परिसमाप्यते' इति न्यायेनास्त्यादिसमभिव्याहारेणैव, एवञ्च सर्वो हि बोधो यत्किञ्चिद्विशेष्यकः क्रियासमभिव्याहृतश्चेति राद्धान्तितो नयस्तत्र व्यापारविशेष्यक उतान्यविशेष्यक इति चेदुच्यते—

'फलानुकूलो यत्नसहितो व्यापारो धात्वर्थः, फलत्वञ्च—तद्धात्वर्थजन्यत्वे सति कर्त्तृप्रत्ययसमभिव्याहारे तद्धात्वर्थनिष्टविशेष्यतानिरूपितप्रकारतावत्त्वम् । व्यापारत्वञ्च—धात्वर्थफलजनकत्वे सति धातुवाच्यत्वम्, अनुकूलत्वं संसर्गः । अनुकूलत्वञ्च—फलनिष्ठजन्यतानिरूपितजनकतावत्त्वम् ।

अथ लः कर्मणीत्यादिना लकाराणां शक्तिबोधनेऽपि बोधकतारूपा शक्तिस्तिङ्क्ष्वेवात उक्तम्—'आश्रये तु तिङः स्मृता' इति । तिङर्थस्तु कर्त्तृकर्मसंख्याकालास्तत्राधाराधेयभावसम्बन्धेन कर्त्तृकर्मणी फलव्यापारयोर्विशेषणे, संख्या च कर्त्तृप्रत्यये कर्त्तरि, कर्मप्रत्यये कर्मणि विशेषणं समानप्रत्ययोपात्तत्वात् । समानप्रत्ययोपात्तत्वञ्च—एकप्रत्ययजन्योपस्थितिविषयत्वम् । एतेन समानाभिधानश्रुतेर्वाक्यापेक्षया बलवत्त्वात् समानपदोपात्तान्वयित्वं विहाय प्रथमान्तार्थेऽन्वयोऽनुचित इति व्यज्यते । कालस्तु व्यापारे विशेषणम् । एवञ्च तिङर्थो विशेषणमेव, व्यापारः प्रधानम् । अत्र यद्यपि प्रकृत्यर्थप्रत्ययार्थयोः सहार्थत्वे प्रत्ययार्थस्यैव प्राधान्यमिति न्यायेन धात्वर्थे व्यापारस्य तिङर्थे विशेषणत्वं वक्तुं शक्यं पाचक औपगव इत्यादिषु प्रकृत्यर्थस्य प्रत्ययार्थे विशेषणत्वात्तथापि 'भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानि' इति यास्कवचःप्रामाण्याद् भावनाप्राधान्यमेव तेनाख्याते ( तिङन्ते ) क्रियाया एव प्राधान्यं शाब्दबोधे न प्रत्ययार्थस्य । न च भावप्रधानमित्यत्र षष्ठीतत्पुरुषाश्रयणेन प्रत्ययार्थप्राधान्यबोधकमेव निरुक्तमिति वाच्यम्, 'आख्यातमाख्यातेन क्रियासातत्ये' इति पाणिनिसूत्रे आख्यातपदेन तिङन्तस्यैव ग्रहणादत्राप्याख्यातं तिङन्तमेवञ्च भावप्रधानमित्यत्र बहुव्रीहेरेव सम्भवात् । एवं च पचतीत्यत्रैकाश्रयिका पाकानुकूला भावना, पच्यते इत्यत्रैकाश्रया या विक्लित्तिस्तदनुकूला भावनेति बोधः पर्यवसितः । भावनाऽपरपर्यायो व्यापार इति । शाब्दबोधेऽनुकूलत्वादिरपदार्थः कुत आयात इति वक्तुं न शक्यम्, 'इहात्मनि ज्ञानमिहाकाशे शब्द इतीह बुद्धिरुत्पद्यमाना न विना सम्बन्धमुत्पत्तुमर्हति तेनानुमीयतेऽस्ति कश्चित्सम्बन्धः शाब्दबोधे' इति नियमात् । इदमभिप्रेत्याह श्रीमद्गदाधरभट्टाचार्यः—शाब्दबोधे चैकपदार्थेऽपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते इति । अतः शाब्दि-

का व्यापारमुख्यविशेष्यकं शाब्दबोधं स्वीकुर्वन्ति। अत एव पश्य मृगो धावतीति वाक्यस्य प्रामाण्यं सङ्गच्छते। पश्य मृगो धावतीत्यत्र मृगकर्तृकं धावनं दृशिक्रियायाः कर्म प्रधानं दृशिक्रियैव तथा च मृगकर्तृकधावनकर्मकं प्रेरणाविषयीभूतं त्वत्कर्तृकं दर्शनमिति बोधः। तत्र मृगो धावतीत्यत्र विशेष्यभूतधावनरूपार्थवाचकस्य धावतीत्यस्य प्रातिपदिकत्वाभावान्न द्वितीया, कर्मत्वन्तु संसर्गमर्यादया भासते इति तत्त्वम्। प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधवादिनां तार्किकाणां नये तु अन्यदेशसंयोगानुकूलकृतिमन्मृगकर्तृकं प्रेरणाविषयीभूतं यद्दर्शनं तदनुकूलकृतिमांस्त्वमिति बोधस्तत्र विशेष्यभूतार्थवाचकमृगशब्दस्य प्रातिपदिकत्वाद्दृशिक्रियाकर्मत्वाच्च द्वितीयापत्तौ धावन्तं मृगं पश्येतिवत् पश्य मृगं धावतीत्यापत्तिः। अथाप्रथमासामानाधिकरण्येन शतृप्रत्ययस्य प्रसङ्गे तु पश्य मृगो धावतीति प्रयोगविलयापत्तिश्च स्यात्। किञ्च तार्किकमते धावति मृग इत्यत्रोभयोः कर्मत्वे धावतीत्यस्य प्रातिपदिकत्वाभावाद्विशेषणत्वेनान्यत्र निराकाङ्क्षत्वाच्च द्वितीयोत्पत्त्यभावेपि मृगशब्दाद्द्वितीया दुर्वारैव। शाब्दिकमते तु क्रियाविशेषणत्वेनेतरार्थे निराकाङ्क्षत्वान्मृगशब्दान्न द्वितीया।

अत्र मृगो धावति तं पश्येति तत्पदाध्याहारे तु वाक्यभेदप्रसङ्गः। उत्कटधावनक्रियाविशेषस्यैव दर्शनकर्मतयाऽन्वयस्य प्रतिपिपादयिषितस्याभावप्रसङ्गाद् भाष्यसिद्धैकवाक्यताऽभावप्रसङ्गश्च। एवञ्च भावनाप्रकारकबोधं प्रति प्रथमान्तपदजन्योपस्थितिः कारणमिति नैयायिकोक्तकार्यकारणभावं परित्यज्याख्यातार्थकर्तृप्रकारकबोधं प्रति धातुजन्योपस्थितिर्भावनात्वावच्छिन्नविषयतया कारणमिति कार्यकारणभावो द्रष्टव्यः। एवं भावनाप्रकारकबोधं प्रति तु कृज्जन्योपस्थितिवद्धात्वर्थभावनोपस्थितिरपि हेतुः। पश्य मृगो धावति, पचति भवतीत्याद्यनुरोधात्। न च विशिष्टार्थवाचकस्य धावति मृग इत्यस्य कर्मत्वेपि पृथङ्मृग इत्यस्य प्रातिपदिकस्य कर्मत्वाभावान्न द्वितीयेति वाच्यम्, अनभिहिताधिकारप्रत्याख्यानपरकभाष्यरीत्या द्वितीयापत्तेर्दुर्वारत्वात्। अत एव प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधं परित्यज्य व्यापारमुख्यविशेष्यकः शाब्दबोधोऽङ्गीक्रियते भाष्यतत्त्वविद्भिः शाब्दिकैरिति दिक्।

## ( ११ ) अथ निपाता द्योतका वाचका वा ।

सुखमनुभवतीत्यादिस्थलेषु अनुभवादिरूपप्रतीयमानोऽर्थः किं धात्वर्थ उतोपसर्गार्थ उत विशिष्टार्थ इत्याकाङ्क्षायां यत्तु नैयायिकाः प्रादीनां द्योतकत्वं चादीनां वाचकत्वं, साक्षात्प्रत्यक्षतुल्ययोरिति कोशान्नमःपदेन 'देवाय नम' इत्यादौ नमस्कारार्थस्य, दानावसरे 'गवे नम' इत्यादौ पूजार्थस्य प्रसिद्धत्वाच्च। सकर्मकत्वञ्च—स्वस्वसमभिव्याहृतनिपातान्यतरार्थफलव्यधिकरणव्यापारवाचकत्वम् । कर्मत्वं च—स्वस्वसमभिव्याहृतनिपातान्यतरार्थफलशालित्वमित्याहुस्तन्न वैषम्ये वीजाभावात् । 'अनुभूयते' इत्यनेन 'साक्षात् क्रियते' इत्यस्य तुल्यत्वात् । नामार्थधात्वर्थयोर्भेदेन साक्षादन्वयाभावात् । निपातार्थफलाश्रयत्वेपि धात्वर्थान्वयं विना कर्मत्वानुपपत्तेश्च । इदमेवाभिप्रेत्य हरिरप्याह—

द्योतकाः प्रादयो येन निपाताश्चादयस्तथा ।
उपास्येते हरिहरौ लकारो दृश्यते यथा ॥ इति ।

येन हेतुना प्रादयो द्योतकास्तेनैव हेतुना चादयो निपातास्तथा द्योतका इत्यर्थः ।

अयमाशयः—ईश्वरमनुभवतीत्यादावनुभवादिः प्रतीयमानो न धात्वर्थो भवतीत्यत्राप्यापत्तेः । नोपसर्गार्थस्तथासत्यप्रकृत्यर्थतया तत्राख्यातार्थानन्वयापत्तेः प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेः । अनुगच्छतीत्यादावनुभवादिप्रत्ययापत्तेश्च । नोपसर्गविशिष्टतद्धात्वर्थः, विशिष्टानुपूर्व्याः शक्ततावच्छेदकत्वे गौरवात् । तथा च धातोरेव विद्यमानत्वादिवाचकस्याऽस्तु लक्षणा, उपसर्गस्तात्पर्यग्राहक इत्यस्तु । तच्च चादिष्वपि तुल्यमित्याह हरिः—

तथाऽन्यत्र निपातेऽपि लकारः कर्मवाचकः ।
विशेषणाद्ययोगोऽपि प्रादिवच्चादिके समः ॥ इति ।

अयम्भावः—साक्षात्क्रियते, अलङ्क्रियते, ऊरीक्रियते शिवः, इत्यादौ धातोस्तत्तदर्थकर्मणि लकारसिद्ध्यर्थं तत्तदर्थबोधकत्वं वाच्यमित्युपसर्गवद् द्योतकत्वं निपातानामपि ।

यद्यपि कृधातोर्घटः क्रियते इत्यादौ कर्मणि लकारदर्शनात् सकर्म-

कत्वमस्त्येव तथापि साक्षात्कारादिरूपार्थेषु सकर्मकत्वं न स्यात् । क्वचिदर्थान्तरमादाय कृञः सकर्मकस्य सर्वत्र तत्त्वाङ्गीकारे तु वायुर्विकुरुते, सैन्धवा विकुर्वते, इत्यत्रापि 'अकर्मकाच्च' इति विहितात्मनेपदानुपपत्तिः स्यात् ।

यत्तूपासनासाक्षात्कारादिर्निपातार्थोऽस्तु 'साक्षात्प्रत्यक्षतुल्ययो'रिति कोशस्वरसात् । तदनुकूलो व्यापार एव धात्वर्थोऽस्तु । स्वस्वयुक्तनिपातान्यतरार्थफलव्यधिकरणव्यापारवत्त्वं सकर्मकत्वम् । अयम्भावः—स्वं धातुस्तद्युक्तनिपातश्च तयोरन्यतरस्यार्थभूतं यत्फलं तद्व्यधिकरणव्यापारवाचकत्वमित्यपि सुवचमिति दृष्टान्तदार्ष्टान्तिकावयुक्ताविति नेदं द्योतकत्वसाधकमिति तन्न, 'तण्डुलः पचती'त्यत्र तण्डुलानां धात्वर्थे कर्मतयाऽन्वयाभावाय नामार्थधात्वर्थयोर्भेदेन साक्षादन्वयासम्भवेन निपातार्थधात्वर्थयोरनुकूलतासम्बन्धेनान्वयस्यैवासम्भवात् । किञ्च प्रादीनां वाचकत्वे 'भूयान् प्रकर्षः', 'कीदृशो निश्चयः' इतिवत् 'भूयान् प्रः', 'कीदृशो निः' इत्यपि स्यात् । मन्मते प्रादेरनर्थकत्वान्न तदन्वय इत्यतो द्योतकता तेषां सिद्ध्यति ।

ननु प्रातिपदिकार्थयोर्भेदान्वये विरुद्धविभक्तिजन्योपस्थितिरिति कार्यकारणभावो निपातातिरिक्तविषय एवेति नोक्तदोष इति चेन्न—

पदार्थः सदृशाऽन्वेति विभागेन कदाचन ।
निपातेतरसङ्कोचे प्रमाणङ्किं विभावय ॥

इति हर्युक्तसिद्धान्तात् । अयम्भावः—समानाधिकरणप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तिर्निपातातिरिक्तविषयेति कल्पने मानाभावो गौरवञ्च । द्योतकतावादिनां नये तु निपातानां द्योतकत्वादन्वय एव नास्ति । पृथगुपस्थितयोरेव संसर्गस्यान्वयरूपत्वादिति नायं दोषः । अपि च निपातानां वाचकत्वे काव्यादावन्वयो न स्यात्तथाहि हरिः—

शरैरुस्रैरिवोदीच्यानुद्धरिष्यन् रसानिव ।
इत्यादावन्वयो न स्यात् सुपाञ्च श्रवणं ततः ॥ इति ।

यत्तु निपातानां द्योतकतावादिमते 'अब्राह्मणः' इत्यादौ तत्पुरुषलक्षणाव्याप्त्यापत्तिः पूर्वपदस्यानर्थकत्वेनैवोत्तरपदार्थप्राधान्याभावात् । प्राधान्यस्यान्यनिरूपितत्वनियमात् । उपसर्गस्यार्थवत्त्वाभावेन प्रातिपदिकत्वाभा-

वाद्विभक्तिश्च ततो न स्यादिति तन्न, नञ्समासादौ योत्तरपदार्थप्रधानता सा, अर्थवत्त्वनिबन्धनप्रातिपदिकत्वमपि द्योतार्थमादायैवेति सिद्धान्तात् । 'अव्ययादाप्सुपः' इति ज्ञापकात्सुबुत्पत्तिः । निपातस्यानर्थकस्येति वार्त्तिकाद्वा प्रातिपदिकत्वम् । कृत्तद्धितसमासाश्चेत्यनुक्तसमुच्चयार्थकचकारेण निपातानां संग्रह इति केचित्, तस्माद्युक्तं निपातानां द्योतकत्वं तदाह हरिः—

नञ्समासे चापरस्य द्योत्यं प्रत्येव मुख्यता ।
द्योत्यमेवार्थमादाय जायन्ते नामतः सुपः ॥
निपातानां वाचकत्वमन्वयव्यतिरेकयोः ।
युक्तं वा न तु तद्युक्तं परेषां मतमेव नः ॥
निपातत्वं परेषां यत्तदस्माकमिति स्थितिः ।
व्यापकत्वाच्छक्ततायास्तवच्छेदकमिष्यते ॥ इति ।

अतोऽनुभूयते सुखं साक्षात्क्रियते गुरुरित्यादौ निपातानां द्योतकत्वमेव तेनानुभवसाक्षात्काररूपफलयोर्धात्वर्थत्वेन सकर्मकत्वं, कर्मसंज्ञकार्थान्वय्यर्थकत्वं सकर्मकत्वमिति निष्कृष्टमते फलाश्रयतया कर्मसंज्ञकस्य धात्वर्थफले एवान्वयौचित्येन द्योतकत्वमावश्यकं द्योतकत्वञ्च—"स्वसमभिव्याहृतपदनिष्ठवृत्त्युद्बोधकत्वम्" । क्वचित्तु—"क्रियाविशेषाक्षेपकत्वम्" । इत्यलम् ।

## ( १२ ) अथ तिङर्थः ।

लट् वर्त्तमाने लेट् वेदे भूते लिट्–लङ्–लुङस्तथा ।
विध्याशिषोस्तु लिङ्–लोटौ लुट्–लृट्–लृङ् च भविष्यति ॥

इति रीत्या यद्यपि लकाराणामेवार्थनिरूपणं नैयायिकैः कृतं तत्र 'वर्त्तमाने लडि'त्यादिसूत्रं 'लः कर्मणी'त्यादिशक्तिग्राहकसूत्रञ्च प्रमाणत्वेनोपन्यस्तं तथाप्युच्चारित एव शब्दोऽर्थप्रत्यायको नानुच्चारित इति भाष्यात्प्रयोगान्तर्गततयाऽऽदेशानां नियतत्वाच्च लोके तथैवानुभवाच्च लादेशतिङामर्थो वैयाकरणैर्निरूपितस्तदाह हरिः—

आश्रये तु तिङः स्मृताः ॥ इति ।

'वर्त्तमाने लडि'त्यादिविधायकसूत्राणां 'लः कर्मणी'त्यादिशक्तिग्राहकसूत्राणाञ्चादेशार्थं स्थानिन्यारोप्य हि प्रवृत्तिस्तथाहि—तिङर्थः कर्त्तृ-कर्म-संख्या-कालाः, तत्र कर्त्तृकर्मणी फलव्यापारयो राधाराधेयभावसंसर्गेण विशेषणे, संख्याकर्त्तृप्रत्यये कर्त्तरि, कर्मप्रत्यये कर्मणि विशेषणं समानप्रत्ययोपात्तत्वात् । अयम्भावः संख्याविशेष-कालविशेष-कारकविशेष-भावा लादेशमात्रस्यार्थास्तथा च लडादेशस्य तिङो वर्त्तमानकालः, शबादिसमभिव्याहारे कर्त्ता, यक्-चिण्समभिव्याहारे भावकर्मणी, उभयसमभिव्याहारे एकत्वादिसंख्या चार्थस्तदुक्तं हरिणा—

> फलव्यापारयोस्तत्र फले तङ्यक्चिणादयः ।
> व्यापारे शप्श्नमाद्यास्तु द्योतयन्त्याश्रयान्वयम् ॥ इति ।

कालस्तु व्यापारे विशेषणम् । एवञ्च तिङर्थः कर्त्ता व्यापारे, कर्म च फले प्रकारः, क्रियाप्रधानमिति यास्कोक्तौ क्रियापदं करणव्युत्पत्त्या व्यापारपरं कर्मव्युत्पत्त्या फलपरं तथा च 'ग्रामं गच्छति देवदत्त' इत्यत्रैकत्वावच्छिन्नदेवदत्ताभिन्नकर्त्तृको वर्त्तमानकालिको ग्रामाभिन्नकर्मनिष्ठो यस्संयोगस्तदनुकूलो व्यापारः । 'ग्रामो गम्यते देवदत्तेने'त्यत्र तु देवदत्तकर्त्तृकवर्त्तमानकालिकव्यापारजन्यो ग्रामाभिन्नकर्मनिष्ठः संयोग इति बोधः । वर्त्तमानत्वं च-प्रारब्धापरिसमाप्तक्रियोपलक्षितत्वम् ।

यत्तु नैयायिका आख्यातस्य कर्त्तरि शक्तौ कृतिमतो व्यापारवतो वा कर्त्तृत्वेनानेककृतिव्यापाराणां शक्यतावच्छेदकत्वकल्पने गौरवाद् यत्नत्वजातेः शक्यतावच्छेदकत्वे च लाघवात् पचतीत्यस्य पाकं करोतीति विवरणे पच्धातुप्रतिपाद्यस्य पाकशब्देनाख्यातप्रतिपाद्यस्यार्थस्य यत्नार्थककरोतिना प्रतीतेश्च विक्रियमाणस्याप्याख्यातस्य यत्नार्थकत्वमावश्यकम् । प्रथमान्तपदेनाक्षेपेण वा तल्लाभाच्चानन्यलभ्ययत्न एव शक्तिः । 'प्रकृतिप्रत्ययौ सहार्थं ब्रूतस्तयोः प्रत्ययार्थः प्रधानम्' इति न्यायानुरोधेन प्रत्ययार्थे यत्ने प्रकृत्यर्थो व्यापारो विशेषणम्, प्रत्ययार्थो यत्नः संख्या चाक्षेपादिलभ्ये प्रथमान्तार्थे विशेषणम् । तथा च देवदत्तस्तण्डुलं पचतीत्यादिवाक्यतस्तण्डुलनिरूपिताधेयताबद्विक्लित्त्यनुकूलव्यापारानुकूलयत्नवाने-

कत्वविशिष्टो देवदत्त इति प्रथमान्तार्थमुख्यविशेष्यक एव बोधः । रथो गच्छतीत्यादौ रथस्याचेतनत्वाद् यत्नशून्यत्वेन व्यापारे आश्रयत्वे वा आख्यातस्य लक्षणेत्याहुस्तन्न, कर्तृकर्मणोराख्यातार्थत्वे फलाश्रयः कर्म, व्यापाराश्रयः कर्ता, तत्र फलव्यापारयोर्धातुलभ्यत्वान्न तिङस्तदंशे शक्तिरन्यलभ्यत्वादनन्यलभ्यो हि शब्दार्थः, शक्यतावच्छेदकञ्चाश्रयत्वं तत्तच्छक्तिविशेषरूपमखण्डभूतमिति स्वीकारेणागौरवात् । 'लः कर्मणि च भावे चाकर्मकेभ्य' इत्यादिपाणिनिसूत्रविरोधापत्तेश्च, न हि तेन व्यापारस्य यत्नस्य वा प्रत्ययार्थता लभ्यते । यद्व्याकरणं साधुत्वमात्रार्थकं न तु शक्तिग्राहकं तदपि न, शक्तिग्रहं व्याकरणोपमानेति नैयायिकोक्तयसङ्गतेः । अर्थविशेषपुरस्कारेणैव साधुत्वस्य भाष्यकृत्सम्मतत्वाच्च । 'पदसमयपरिपालनाय व्याकरणं प्रवृत्तम्' । इति न्यायभाष्योक्तेश्च युष्मदस्मदोर्लकारेण सामानाधिकरण्याभावात् पुरुषव्यवस्थानापत्तेश्च । पचन्तं चैत्रं पश्य, पचते देवदत्ताय देहि, इत्यादौ शतृशानजादीनामपि तिबादिवल्लादेशाविशेषेण तेभ्यः कृतिमात्रबोधापत्तेश्च ।

लिडादेशतिङो भूतानद्यतनकालः, परोक्षत्वञ्चाधिकोऽर्थः । संख्याकारकं लड्वत् । परोक्षत्वं च क्रियाविशिष्टे कारके विशेषणं न तु क्रियायां तस्या अतीन्द्रियत्वेन भाष्ये प्रतिपादनाद्व्यभिचाराभावात् । तेन गमनादिक्रियानाविष्टस्य देवदत्तस्य दर्शनेऽपि न 'देवदत्तो जगाम' इत्यादिप्रयोगानुपपत्तिः । न च क्रियाया अतीन्द्रियत्वे पश्य मृगो धावतीत्यत्र धावनस्य दर्शनविषयत्वानुपपत्तिरिति वाच्यं, तत्र दृशेर्ज्ञानसामान्यार्थकत्वाङ्गीकारात् । मंक्षु मंक्षु देशान्तरसंयोगदर्शनेन धावनमनुमीयते इति तस्यानुमितिविषयमेव पश्य मृगो धावतीत्यत्र बुध्यते इति तत्त्वम् । कृभ्वाद्यनुप्रयोगस्थले कृभ्वस्तां क्रियासामान्यमर्थः, आम्प्रकृतेस्तु तत्तत्क्रियाविशेषः, सामान्यविशेषयोरभेदान्वयः । अकर्मकप्रकृतिकामन्तानुप्रयुक्तकृभ्वसामकर्मिकैव क्रियेत्यपि केचित् ।

वस्तुतस्त्वाम्प्रकृतिभूतधातोरेव सकर्मकत्वाकर्मकत्वव्यवहारस्य युक्तत्वेनानुप्रयुक्तानां कृभ्वसां फलशून्यक्रियासामान्यवाचकत्वमेव न्याय्यम् । परोक्षत्वं च साक्षात्कृतमित्येतादृशविषयताशालिज्ञानाविषयत्वम् । भूतान-

द्यतनत्वं चाद्यतनाष्टप्रहरीव्यतिरिक्तत्वे सति भूतत्वं, भूतत्वं च वर्त्तमानध्वंसप्रतियोगिसमयवृत्तित्वम् ।

लुडादेशस्य तु भविष्यदनद्यतनोऽर्थोऽधिकः, शेषं लड्वत् । भविष्यत्वं च वर्त्तमानप्रागभावप्रतियोगिक्रियोपलक्षितत्वम् ।

लृट्तिङस्तु भविष्यत्सामान्यमर्थः ।

लेट्तिङस्तु विध्यादिरर्थः ।

लोट्तिङस्तु विध्यादिरर्थस्तत्र विधिः प्रेरणं, निमन्त्रणं नियोगकरणम्, आमन्त्रणं कामचारानुज्ञा, अधीष्टः सत्कारपूर्वको व्यापारः । आशीश्चार्थः ।

लङादेशतिङो भूतानद्यतनत्वमधिकोऽर्थः शेषं लड्वत् ।

लिङादेशस्य तिङो विध्यादिरर्थः, आशीश्च ।

लुङादेशस्य तु भूतसामान्यमर्थः ।

लृङादेशस्य तु क्रियातिपत्तौ गम्यमानायां हेतुहेतुमद्भावे च गम्यमाने भूतत्वं भविष्यत्वञ्चार्थः, आपादना तु गम्यमाना ।

यत्तु तार्किकाः पचतीत्यादिप्रयोगान्तर्गतास्तिङो न वाचकास्तेषां बहुत्वेन शक्त्यानन्त्यापत्तेः । एधाञ्चक्रे ब्रह्मेत्यादावादेशलुगादेरभावरूपस्य बोधकत्वासम्भवाच्च किन्तु तैः स्मृता लकारा एव वाचका लत्वस्य जातिरूपतया शक्ततावच्छेदकौचित्यात्, अव्यभिचाराच्च । आदेशानां भिन्नतया परस्परव्यभिचरितत्वात् । लः कर्मणीत्यादिपाणिन्यनुशासनानुगुण्याच्च नह्यादेशेऽर्थवत्ताबोधकमनुशासनमुपलभामहेऽतस्तिङामर्थनिरूपणमयुक्तमित्याहुस्तन्न, व्यवस्थानुरोधात् । तथा हि—पचतीत्यादौ लकारमविदुषो बोधान्न तस्य वाचकत्वं न च तेषां तिङ्क्षु शक्तिभ्रमाद् बोधस्तस्य भ्रमत्वे मानाभावात् । स्थानिनामपि तत्तद्वैयाकरणैः स्वेच्छया भिन्नानामभ्युपगमात् । सर्वेषां शक्तत्वे गौरवं व्यभिचारश्चास्त्येव आदेशानां प्रयोगान्तर्गततया युक्तं तेषां वाचकत्वं तथा चादेशिस्मरणकल्पना नेति लाघवम् । व्यवहृतेश्च, व्यवहारस्तावच्छक्तिग्राहकेषु मुख्यस्स च श्रूयमाणतिङादिष्वेवेति तिङ एव वाचकाः । 'तद्धेतोरेव तत्त्वे किं तेन' इति लाघव-

मूलकन्यायाच्च । तथा हि—लकारस्य वोधकत्वे भूल् इत्यतोऽपि वोधापत्तिस्स्यात् । तादृशबोधे भव+अति, इति समभिव्याहारोऽपि कारणमिति चेत्तर्ह्यावश्यकत्वादस्तु तादृशसमभिव्याहारस्यैव वाचकत्वशक्तिरन्यथा लकारस्य वाचकत्वं समभिव्याहारस्य कारणत्वञ्चेत्युभयं कल्प्यमिति गौरवं स्यात् । अपि च लकारस्यैव वाचकत्वे कृत्तिङोः कर्तृभावनावाचकत्वव्यवस्था त्वत्सिद्धान्तसिद्धा न स्यात् स्थानिनो लकारस्योभयत्रैक्यात् । न च शानजादौ कृतिर्लकारार्थ आश्रयः शानजर्थः इत्यस्तु कर्त्तरि कृदित्यनुशासनात्, स्थान्यर्थेन निराकाङ्क्षतया शानजादौ कर्त्तरि कृदित्यस्याप्रवृत्तेरन्यथा घञादावपि प्रवर्त्तेत । अत एव वैयाकरणैः स्थानिनां वाचकत्वमतं विहाय युक्तियुक्तमादेशानां वाचकत्वमङ्गीकृतमिति विभावनीयम् ।

इति विद्यावाचस्पतिना व्याकरणतीर्थेन श्रीरमाकान्तठक्कुरेण
विरचितं प्रवन्धामृतं सम्पूर्णम् ।

❀ शुभं भूयात् ❀

# ग्रन्थकर्त्तुः परिचयः

दरभङ्गामण्डलान्तर्गतसर्वसीमाग्रामवास्तव्यानां विशुद्धश्रोत्रियवंशजानां खण्डवलाकुलावतंसानामन्यतमः सदाचारकर्म्मपरायणस्तन्त्रवित् 'तिसौत' इत्यभिधया प्रथमश्रेण्या विभूषितो दरभङ्गाराजसम्मानितः साक्षान्महेश्वर इव महेश्वरठक्कुर आसीत् । तस्य पञ्चानामात्मजानां चतुर्थो नित्यनैमित्तिककर्म्मनिष्णातः साधारणतया न्यायशास्त्रज्ञो निजकुलाचारपालनदृढभक्तोऽनवरतं महाभारतादिविचारपरिशीलनलग्नचेता राधाकृष्णठक्कुरो यो निजपुण्यतेजसा चरमेऽपि वयसि मध्यवयस्क इव तिष्ठन् द्विसप्ततितमेऽब्दे सज्ञानं मुमूर्षुः 'कृष्ण ! त्वदीयपदपङ्कजपिञ्जरान्ते, अद्यैव मे वसतु मानसराजहंसः । प्राणप्रयाणसमये कफवातपित्तैः कण्ठावरोधनविधौ स्मरणं कुतस्ते ॥' इत्यादिकं पद्यमुच्चैः पठन् श्रीकृष्णं स्मरंश्च दिवं गतस्तस्य कनिष्ठस्तनुजन्मा मत्पितृव्यो गुरुतमश्च लब्धविद्यावाचस्पतिपदवीकः श्रीमान् श्रीलरमाकान्तठक्कुरोऽस्य रचयिता, मामकानां छात्रवृन्दानां कृतेऽनेन ग्रन्थेन महतीमुपकृतिं चकार । अहं चाक्षरारम्भात् व्याकरणाचार्य्याखिलग्रन्थानधीत्यास्याध्यापनशैलीं दर्शं दर्शं नितरां मुग्धश्चरमव्याकरणाचार्य्योपाधिनाऽलङ्कृतो वर्त्तेऽयमेव प्राक् भागत्रयात्मकं पौरोहित्यकर्म्मसाराभिधं ग्रन्थं निर्माय सर्वेषां सदाचारकर्म्मनिरतानां प्रेमास्पदो जातः । अयञ्च विहारोत्कलसंस्कृतसमितितो व्याकरणतीर्थपरीक्षां मिथिलाराजकीयधौतपरीक्षाञ्चोत्तीर्य साहित्यकर्म्मकाण्डयोर्लब्धप्रतिष्ठः १९२२ ई० वर्षतश्छात्रानध्यापयति । किं बहुनाऽस्य बहवोऽन्तेवासिनो व्याकरणसाहित्यकर्म्मकाण्डधर्म्मशास्त्राणामाचार्य्यपरीक्षामुत्तीर्यच्छात्रानध्यापयन्ति कृतमधिकेनेति ।

भवतां वशंवदः

**कृपाकान्तठक्कुरः**

व्याकरणाचार्यः

# काव्य-प्रबन्धः

## अनेक शिक्षासंस्थाओं द्वारा स्वीकृत प्रबन्धग्रंथ

इस पुस्तक में काव्य, वाक्य, शब्दार्थ, तात्पर्यार्थ, शक्ति, संकेतग्रह, जातिवाद, लक्षण, व्यंजना, ध्वनि, रस, स्थायिभावभेद, गुणालंकार भेद तथा श्लेषालंकार भेदों का निरूपण करके कवित्व का लक्षण तथा महाकवि कालिदास, भवभूति, भारवि, शूद्रक, माघ, दण्डी, बाण आदि कवियों की परीक्षोपयोगी संक्षिप्त जीवनियों तथा उनकी कृतियों पर विशेष प्रकाश डाला गया है। १-५०

# अलङ्कारपीयूष

सभी परीक्षाओं में अलंकारों का प्रायः एक निश्चित-सा ही पाठ्यक्रम स्वीकृत है। इसीलिये संस्कृत के अलंकार-ग्रन्थों से मुख्य-मुख्य ५२ अलंकार चुनकर लेखक ने लक्षणोदाहरणों की विशद व्याख्या के साथ उन्हें इस पुस्तक में संकलित किया है। भाषा-शैली आदि सब विषय एवं छात्रों के बौद्धिक स्तर के अनुकूल है। बहुत सी आवश्यक शास्त्रीय बातों का ज्ञान विचारपूर्ण भूमिका मात्र से हो जाता है। परीक्षार्थियों के लिये यह पुस्तक पूर्णरूप से उपयुक्त है। मूल्य १-५०

# उत्कीर्णलेखपञ्चकम्

(वाराणसी तथा दरभंगा संस्कृत विश्वविद्यालय की शास्त्रिपरीक्षा में पाठ्यनिर्धारित)

इस अभिनव संस्करण में १. रुद्रदामन् का जूनागढ़-शिलालेख, २. महाराज-चन्द्र का मिहरौलीस्तम्भलेख, ३. कुमारगुप्त का यशोवर्मा का शिलालेख और ५. बीसलदेव का पाँच शिलालेखों का संग्रह किया गया है। परी 'पदार्थ-बोधक' हिन्दी अनुवाद भी किया गय में 'टिप्पणी' और 'ऐतिहासिक महत्त्व' तथा प्र भूमिका होने से यह संस्करण छात्रों के लिये परमोपयोगी हो गया है। मूल्य २-५०

Library IIAS, Shimla
S 891.202 4 T 326 P
00006524

प्राप्तिस्थानम्—चौखम्बा संस्कृत सीरीज आफिस, वाराणसी-१